कुलार्णव

नं० ११२९




श्री रणवीर पुस्तकालय
मंदर श्रीरघुनाथ
सं.
नं.

श्री॰ कु॰ १

ॐ स्वस्ति श्रीगणेशाय नमः श्रीगुरुभ्यो नमः
ॐ नमः त्रिपुरसुंदर्यै अथ श्रीजलार्णवलि
ख्यते ॐ श्रीगुरुं गणपतिं दुर्गां वटुकं शिवमच्यु
तं ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वंदे वि
भूतये १ अनाद्यायाखिलाद्याय मायिने ग
तमायिने अरूपाय स्वरूपाय शिवाय गुर
वे नमः २ परप्रासादमंत्रोयस्तच्चिदानं
दतेजसे अग्निषोमस्वरूपाय सांविकाय न
मोस्तु ते श्रीदेव्युवाच भगवन्देवदेवेश पं
चकृत्यविधायक सर्वज्ञ भक्तिसुलभः शर
णागतवत्सलः १ महेश परमेशान करुणा
मृतवारिधे असारे घोरसंसारे सर्वदुःखम
लीमसे २ नानाविधशरीरस्था ह्यनंता जी
वराशयः जायंते च म्रियंते च तेषामंतो न
विद्यते ३ सदा दुःखातुरा एव न सुखी विद्य
ते क्वचित् केनोपायेन देवाश्च मुच्यंते वद मे
प्रभो ४ ईश्वर उवाच शृणु देवि प्रवक्ष्यामि
यन्मां त्वं परिपृच्छसि तस्य श्रवणमात्रेण

देशं व्याधिस्थः किंकरिष्यति २३ यावन्निष्टति
देहीयंतावत्तत्वंसमभ्यसेत् संदीप्ते भवने
कोनुकूपंखनतिदुर्मतिः २४ व्याघ्रीवास्तेज
रावायुर्यातिभिन्नघटांबुवत् निघ्नंतिरिपुव
द्रोगास्तस्माछ्रेयः समभ्यसेत् २५ यावन्नाश्र
यतेदुःखंयावन्नायांतिचापदः यावन्नेंद्रियवै
कल्यंतावछ्रेयः समभ्यसेत् २६ कालोनज्ञा
यतेनानाकार्यैः संसारसंभवैः सुखदुःखैर्जनो
हंतेनवेत्तिहितमात्मनः २७ जातानार्तान्मृता
नापद्गस्तान्नष्टान्दृष्ट्वाचदुःखितान् लोकोमोह
सुरांपीत्वानविभेतिकदाचन २८ संपदः
स्वप्नसंकाशायौवनंकुसुमोपमं तडिच्चपल
मायुष्यंकस्यस्याज्ज्ञानतोधृतिः २९ शतंजी
वितमत्यल्पंनिद्रालस्यैस्तदर्धकं बाल्यरोग
जरादुःखैरर्धंतदपिनिष्फलं ३० प्रारब्धव्ये
निरुद्योगोजागर्तव्येप्रसुप्तकः विश्वस्तव्योभ
यस्थानेहानरःकोनहन्यते ३१ तोयफेनस
मेदेहेजीवेनाक्रम्यसंस्थिते अनित्येप्रियसं

चिल्लभ्यते जंतुर्मनुष्यं पुण्यसंचयात् १४ सोपा
नभूतं मोक्षस्य मानुष्यं प्राप्य दुर्लभम् यस्ता
रयति नात्मानं तस्मात्पापतरोत्र कः १५ नरः
प्राप्योत्तमं जन्म लब्ध्वा चेंद्रियसौष्ठवं नवेत्त्या
त्महितं यस्तु स भवेद्ब्रह्मघातकः १६ विना
देहेन कस्यापि पुरुषार्थो न विद्यते तस्माद्दे
हधनं रक्षेत्पुण्यकर्माणि साधयेत् १७ रक्ष
येत्सर्वदात्मानमात्मा सर्वभाजनं रक्षणे यत्न
मातिष्ठेज्जीवन्भद्राणि पश्यति १८ पुनः ग्रामः
पुनः क्षेत्रं पुनर्वित्तं पुनर्गेहं पुनः शुभाशुभं
कर्म न शरीरं पुनः पुनः १९ शरीररक्षणोपा
यः क्रियते सर्वदा बुधैः नेच्छंति च वपुस्त्या
गमपि कुष्ठादिरोगिणः तद्गोपितं स्याद्धर्मा
र्थं धर्मं ज्ञानार्थमेव च ज्ञानं तु ध्यानयोगा-
र्थमचिरात्प्रविमुच्यते २१ आत्मैव यदिना
त्मानमहितेभ्यो निवारयेत् कोन्यो हितकर
स्तस्मादात्मानं तारयिष्यति २२ इहैव नरके
व्याधेश्चिकित्सां न करोति यः गत्वा निरौषधं

जरादर्शितपंथानं प्रचंडव्याधिसैनिकं मृत्यु
शत्रुमविशेषोसि जानानः किं न पश्यसि ४२ तृ
ष्णासूचीविनिर्भिन्नं सिक्तं विषयसर्पिषा रा
गद्वेषानले पक्वं मृत्युरश्नाति मानवं ४३ बा
लांश्च यौवनस्थांश्च वृद्धान्गर्भगतानपि स
र्वानाविशते मृत्युरेवंभूतमिदं जगत् ४४
ब्रह्मविष्णुमहेशादिदेवताभूतजातयः ना
शमेवानुधावंति तस्माच्छ्रेयः समभ्यसेत् ४५
स्वस्ववर्णाश्रमाचारलंघनाद्दुष्प्रतिग्रहात्
परस्त्रीधनकामाच्च नृणामायुक्षयो भवेत् ४६
वेदशास्त्राद्यनभ्यासात्तथैव गुरुवंचनात् नृ
णामायुक्षयो भूयादिंद्रियाणामनिग्रहात् ४७
व्याधिराधिर्विषं शस्त्रं सर्पपशवोमृगाः नि
र्वाणं येन निर्दिष्टं तेन गच्छंति जंतवः ४८
जीवस्तृणजलौकावद्देहाद्देहांतरं व्रजेत्
संप्राप्य चोत्तरांशेन देहं त्यजति पौर्विकं ४९
बाल्ययौवनवृद्धत्वं यथा गेहांबरादिकं तथा
देहांतरप्राप्तिर्गेहाद्गृहमिवागतः ५० जनाः

श्री॰ कृ॰ ३

3

वासेकथंतिष्ठंतिनिर्भया: ३२ अहितेहितसंद्वः
स्मादक्षवेक्षवचिंतकः अनर्थेचार्थविज्ञानः
समर्थेयोनवेत्तिसः ३३ पश्यन्नपिप्रस्खल
तिश्रृण्वन्नपिनवुध्यति पठन्नपिनजानाति
देविमायाविमोहितः ३४ सन्निमज्जज्जगदि
दंगंभीरेकालसागरे मृत्युरोगजराग्राहैकैः
नकश्चिदपिवुध्यति ३५ प्रतिक्षणमयंकालः
क्षीयमानोनलक्ष्यते आमकुंभइवांभस्थोवि
शीर्णोनविभाव्यते ३६ युज्यतेवेष्टनंवायोरा
काशस्यचखंडनं ग्रथनंचतरंगाणामास्थाना
युषियुज्यते ३७ पृथिवीदह्यतेयेनमेरुश्चापि
विशीर्यते शुष्यतेसागरजलंशरीरेदेविका
कथा ३८ अपत्यंमेकलत्रंमेधनंमेवांधवा
श्चमे लपंतमितिमर्त्याजंहंतिकालवृकोव
लात् ३९ इदंकृतमिदंकार्यमिदमन्यत्कृता
कृतं एवमीहासमायुक्तंमृत्युहन्तिनरंप्रिये
४॰ स्वःकार्यमद्यकुर्वीतपूर्वाह्णेचापराह्णिकं
नहिमृत्युः प्रतीक्षेतकृतवाप्यथवाकृतं ४१

संसारान्मुच्यते नरः ५ अस्ति देवि परब्रह्म
स्वरूपी निष्कलः शिवः सर्वज्ञः सर्वकर्त्ता च
सर्वेशो निर्मलोऽद्वयः ६ स्वयंज्योतिरनाद्यंतो
निर्विकारः परात्परः निर्गुणः सच्चिदानंद
स्तदंशा जीवसंज्ञकाः ७ अनादिसिद्योप
हता यथाग्नौ विस्फुलिंकाः देवाद्युपाधिसं
भिन्नास्ते कर्मभिरनादिभिः ८ सुखदुःखप्र
दैः पुण्यपापरूपैर्नियंत्रिताः तत्तज्जातियुतं
देहमायुर्भोगं च कर्मजं ९ प्रतिजन्म प्रपद्यं
ते तेषामप्यपरं पुनः सूक्ष्मलिंगशरीर
स्यमामोक्षादक्षरं प्रिये १० स्थावराः कृमय
श्चाब्जाः पक्षिणः पशवो नराः धार्मिकास्त्रिद
शास्तद्वन्मोक्षिणश्च यथाक्रमं ११ चतुर्विध
शरीराणि धृत्वा मुक्त्वा सहस्रशः सुकृता
न्मानवो भूत्वा ज्ञानी चेन्मोक्षमाप्नुयात् १२ च
तुरशीतिलक्षेषु शरीरेषु शरीरिणां नमा
नुष्यं विनान्यत्र तत्वज्ञानं तु लभ्यते १३ अत्र
जन्मसहस्राणां सहस्रैरपि पार्वति कदा

श्री॰ कु॰ ५

कृत्वेहकर्माणिसुखदुःखानिभुंजते परत्रा
त्मानिनोदेवियांत्यायांतिपुनःपुनः ५१ इह
यत्क्रियतेकर्मतत्परत्रोपभुज्यतेसिक्तमूल
स्यहृक्षस्यफलशाखासुदृश्यते ५२ दारिद्र्य
दुःखरोगाश्चबंधनंव्यसनानिच आत्मापरा
धवृक्षाणांफलान्येतानिदेहिनां ५३ निःसं
गएवमोक्षःस्याद्दोषाःसर्वेपिसंगजाः संगा
त्यजत्यथोज्ञानीचावश्यंकिमुताल्पवित् ५४
संगःसर्वात्मनात्याज्यःसचेत्त्यक्तुंनशक्यते
महद्भिःसहकर्तव्यःसंतःसंगस्यभेषजं ५५
सत्संगश्चविवेकश्चनिर्मलंनयनद्वयं यस्य
नास्तिनरःसोंधःकथंनस्यादमार्गगाः ५६
यावंतःकुरुतेजंतुःसंबंधान्मनसःप्रियान्
तावंतोस्यनिखन्यंतेहृदयेशोकशंकवः ५७
स्वदेहमपिजीवोयंमुक्त्वायातिकुलेश्वरि स्त्री
मातृपितृपुत्रादिसंबंधःकेनहेतुना ५८
दुःखमूलंहिसंसारःसयस्यास्तिसदुःखितः
तस्यत्यागःकृतोयेनससुखीनापरःप्रिये ५९

प्रभवं सर्वदुःखानामालयं सकलापदां आश्र
यं सर्वपापानां संसारं वर्जयेत्प्रिये ९० अखंड
बंधनं घोरमस्त्रीकृत्य महाविषं अशास्त्रखं
डनं देवि संसारासक्तचेतसां ९१ आदिमध्या
वसानेषु दुःखं सर्वमिदं यतः तस्मात्संत्यज्य
संसारं तत्वनिष्ठः सुखी भवेत् ९२ लोहदारुम
यैः पाशैः दृढवद्धो विमुच्यते स्त्रीधनादिषु सं
सक्तो मुच्यते न कदाचन ९३ ऊर्द्ध्वं व चिंताथक्त
स्यजंतः सत्वादयो गुणाः अपक्वं भुंजमानस्य
नश्यंत्यंगानि तेन हि ९४ वंचिताशेषचिंतैस्ते
र्नित्यं लोको विनाशितः हा हंत विषयाहारैर्दे
हस्थेंद्रियतस्करैः ९५ मांसलुब्धो यथा मत्स्यो
लोहशंकुं न पश्यति सुखलुब्धस्तथा देही य
मवाधां न पश्यति ९६ हिताहितं न जानंतो नि
त्यमुन्मार्गगामिनः कुक्षिपूरणनिष्ठा ये ते वृ
था नारकाः प्रिये ९७ निद्राहिमैथुनाहाराः सर्वे
षां प्राणिनां समाः ज्ञानवान्मानवः प्रोक्तो ज्ञान
हीनः पशुः प्रिये ९८ प्रभाते मलमूत्राभ्यां क्षुत्

श्री
कु
५

ओंमध्यगेरवौ रात्रौ मदननिद्राभ्यां बाध्यते मा
नवः प्रिये ६९ स्वदेहिनदारादिनिरताः सर्व
जंतवः जायंते च म्रियंते च हा हंताज्ञानमोहि
ताः ७० स्वस्ववर्णाश्रमाचारनिरताः सर्वमान
वाः न जानंति परं धर्मं वृथा नश्यंति पार्वति ७१
क्रियायासपराः केचिद्व्रतचर्यादिसंयुताः अज्ञा
नसंवृतात्मानः संचरंति प्रतारकाः ७२ नाममा
त्रेण संतुष्टाः कर्मकांडरता नराः मंत्रोच्चारण
मात्रेण भ्रामिताः क्रतुविस्तरैः ७३ एकभुक्तोप
वासाद्यैर्नियमैः कायशोषणैः मूढाः परोक्षमि
च्छंति तव मायाविमोहिताः ७४ देहदंडनमात्रे
ण का मुक्तिरविवेकिनां वल्मीकताडनाद्देवि
मृतः कुत्र महोरगः ७५ जटाभाराजिनैर्युक्ता
दांभिका वेषधारिणः भ्रमंति ज्ञानिवल्लोके
भ्रामयंति जनान्प्रिये ७६ संसारजसुखासक्तं
ब्रह्मज्ञोस्मीति वादिनं कर्मब्रह्मोभयभ्रष्टं तं
त्यजेदंत्यजं यथा ७७ गेहारण्यसमा लोके ग
तव्रीडा दिगंबराः चरंति गर्दभाद्याश्च विरक्ता

स्तेभवंतिकिं ७८ मज्जनोन्मूलनादेवमुक्ताश्च
र्यदिमानवाः मज्जनवासीनित्यंच्छासकिंमु।
क्तोभविष्यति ७९ शीतवातातपसहाभक्ष्याभ
क्ष्यसमाप्रिये तिष्ठंतिसूकराद्यास्त्वज्ञानिनास्ते
भवंतिकिं ८० तृणपर्णादिकाहाराःसततंव
नवासिनः हरिणादिमृगादेविस्तापसास्तेभ
वंतिकिं ८१ आजन्ममरणांतंयेगंगादितटि
नीस्थिताः मंडूकमत्स्यप्रमुखाहन्तिनस्तेभवं
तिकिं ८२ वदंतिस्पदयानंदंपठंतिशुकशारि
काः जनानांपुरतोदेविविबुधास्तेभवंतिकिं ८३
पारावताःशिलाहाराःपरमेश्वरिचातकाः नपि
वंतिमहीतोयंयोगिनस्तेभवंतिकिं ८४ तस्मा
दित्यादिकंकर्मलोकरंजनकारकं मोक्षस्यका
रणंसाक्षात्तत्त्वज्ञानंकुलेश्वरि ८५ षट्दर्शन
महाकूपेपतिताःपशवःपरे परमार्थंनजानंति
पशुपाशनियंत्रिताः ८६ वेदशास्त्रार्णवेघोरे
उह्यमानाइतस्ततः षडूर्मिनिग्रहग्रस्तास्तिष्ठंति
हिकुतार्किकाः ८७ वेदागमपुराणज्ञःपरमार्थं

श्री॰
कु॰
८
6

नवेत्तियः विडंवकस्यन्नस्यांतत्तत्त्वंकाकभाषितं ८८ इदंज्ञाममिदंज्ञेयमितिचिंतासमाकुलाः पठं त्यहर्निशंदेविपरतत्त्वपराङ्मुखाः ८९ वाक्यछंदोनिबंधेनकाव्यालंकारशोभिनः चिंतयादुःखितामूढास्तिष्ठंतिव्याकुलेंद्रियाः ९० अन्यथापरमंतत्त्वंजनाःक्लिश्यंतिचान्यथा अन्यथाशास्त्रसद्भावोव्याख्यांकुर्वंतिचान्यथा ९१ कथयंत्युन्मनीभावंस्वयंनानुभवंतिच अहंकाररताःकेचिदुपदेशादिवर्जिताः ९२ पठंतिवेदशास्त्राणिबोधयंतिपरस्परं नजानंतिपरंतत्त्वंदर्वीपाकरसंयथा ९३ शिरोवहतिपुष्पाणिगंधंजिघ्रतिनासिका पठंतिवेदशास्त्राणिदुर्लभोभावबोधकः ९४ तत्त्वमात्मस्थमज्ञात्वामूढःशास्त्रेषुमुह्यति गोपःकुक्षिगतेछागेकूपेपश्यतिदुर्मतिः ९५ संसारमोहनाशायशाब्दबोधोनहिक्षमः ननिवर्तेतितिमिरंकदाचिद्दीपवार्तया ९६ प्रज्ञाहीनस्यपठनंमंयथान्धस्यदर्पणंयथा देविप्रज्ञावतःशास्त्रंतत्त्वज्ञानस्यसाधनं ९७

अयतः प्रहतः केचित्सार्द्धयोरिति केचन त
त्त्वमीदृक्तादृगिति विवदन्ति परस्परं ९८ सद्वि
द्यादानशौर्यादिश्रेष्ठैर्गुणैर्विख्यातमानवः ईदृश
स्तादृशश्चेति दूरतः कथ्यते जनैः ९९ प्रत्यक्ष
ग्रहणं नास्ति वार्त्तया ग्रहणं प्रिये एवं ये शा
स्त्रसंमूढास्ते दूरस्था न संशयः १॰ इदं ज्ञा
नमिदं ज्ञेयमिति वेदितुमिच्छति दिव्यवर्ष
सहस्रायुः शास्त्रान्तं नैव गच्छति ११ वेदान्यने
कशास्त्राणि अल्पायुर्विघ्नकोटयः तस्मात्सारं
विजानीयात्क्षीरं हंसइवाम्भसि २ अभ्यस्य वे
दशास्त्राणि तत्त्वं ज्ञात्वाथ बुद्धिमान् पलाल
मिव धान्यार्थी सर्वं शास्त्राणि संत्यजेत् ३ य
थामृतेन तृप्तस्य नाहारेण प्रयोजनं त
त्त्वज्ञस्य तथा देवि न शास्त्रेण प्रयोजनं ४ न वे
दाध्ययनान्मुक्तिर्न शास्त्रपठनादपि ज्ञानादे
व हि कैवल्यं नान्यथा वीरवंदिते ५ नाश्रमः
कारणं मुक्तेर्दर्शनानि न कारणं तथैव सर्व
कर्माणि ज्ञानमेव हि कारणं ६ मुक्तिदा गुरुवा

गेपकाविद्याः सर्वा विडंबकाः काष्ठभारसहस्रे
ष्वेकं संजीवनं परं ७ अद्वैतं हि शिवे प्रोक्तं
क्रियायोसविवर्जितं गुरुवक्त्रेण लभ्येतं ना
धीतागमकोटिभिः ८ आगमोक्तं विवेकोत्थं
द्विधा ज्ञानं प्रचक्षते शाब्दब्रह्मागममयं परं
ब्रह्म विवेकजं ९ अद्वैतं केचिदिच्छंति द्वैतमि
च्छंति चापरे समं तत्त्वेन जानंति द्वैताद्वैतवि
वर्जितं १० द्वे पदे बंधमोक्षायनममेति ममे
ति च ममेति बध्यते जंतुर्नममेति प्रमुच्यते ११
तत्कर्म यन्न बंधाय सा विद्या या विमुक्तिदा आ
यासाया परं कर्म विद्यान्या शिल्पनैपुणं १२
यावत्कर्माणि दीप्यंते तावत्तत्त्वकथाकुतः १३
यावद्देहाभिमानश्च ममता यावदेव हि या
वत्प्रयत्नवेगोस्ति तावत्संकल्पकल्पना १४
यावन्नो मनसस्थैर्यं तावत्तत्त्वकथा कुतः या
वन्न गुरुकारुण्यं तावत्तत्त्वकथा कुतः १५
तावत्तपो व्रतं तीर्थं जपहोमार्चनादिकं वेद
शास्त्रागमकथा यावत्तत्त्वं न विंदति १६ तस्मा

त्सर्वप्रयत्नेन सर्वावस्थासु सर्वदा तन्ननि
ष्टो भवेद्देवि यदीच्छेन्मोक्षमात्मनः १७ धर्मज्ञा
नप्रसूनस्य स्वर्गभोगफलस्य च ज्ञापनत्रयादि
संतप्तः छायां मोक्षतरोः श्रयेत् १८ बहुनात्र
किमुक्तेन रहस्यं शृणु पार्वति कुलमार्गादृते
मुक्तिर्नास्ति सत्यं न संशयः १९ तस्मात्कुला
र्थतत्त्वं हि विदित्वैवं श्रीगुरोर्मुखात् सुखेन मुच्य
ते जंतुर्घोरसंसारबंधनात् २० इति ते कथितं
किंचिज्जीवजातिस्थितिं प्रिये समासेन कुलेशा
नि किं भूयः श्रोतुमिच्छसि २१ इति श्रीकुलार्ण
वे महारहस्ये जीवजातिस्थितिकथनं नाम
प्रथमोल्लासः १ श्रीदेव्युवाच ॐ कुलेश श्रो
तुमिच्छामि सर्वजीवदयानिधे कुलधर्मस्व
या देव सूचितो न प्रकाशितः १ तस्य धर्म
स्य माहात्म्यं सर्वधर्मोत्तमस्य च वद मे परमे
शान यदि ते स्ति कृपा मयि २ श्रीईश्वर उवाच
शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि
तस्य श्रवणमात्रेण योगिनीनां प्रियो भवेत् ३

ब्रह्मविष्णुगुहादीनांनमयाकथितंपुरा कथया
मितवस्नेहाच्छृणुष्वैकाग्रमानसा ४ पारंपर्यक्र
मायातंवक्त्राद्वक्त्रंमरस्थितं अकथ्यंपरमार्थे
नतथापिकथयामिते ५ तस्माद्गोपितव्यंहि
नदेयंयस्यकस्यचित् देयंभक्तायशिष्यायचा
न्यथापतनंभवेत् ६ सर्वेभ्यश्चोत्तमावेदावेदे
भ्योवैष्णवंपरं वैष्णवादुत्तमंशैवंशैवाद्दक्षिण
मुत्तमं ७ दक्षिणादुत्तमंवामंवामात्सिद्धान्तमुत्त
मं सिद्धान्तादुत्तमंकौलंकौलात्परतरंनहि ८ गु
ह्याद्गुह्यतरंदेविसारात्सारंपरात्परं साक्षात्पर
शिवंदेवंकर्णात्कर्णगतंपरं ९ मथित्वाज्ञानमं
थेनवेदागममहार्णवं सारज्ञेनमहादेविकु
लधर्मःसमुद्धृतः १० एकतःसकलाधर्मायज्ञ
तीर्थव्रतादयः एकतःकुलधर्मस्तत्रकौलो
धिकःप्रिये ११ प्रविशन्तियथानद्यःसमुद्रंऋजु
वक्रगाः तथैवसमयाःसर्वेप्रविष्टाःकुलमेवहि
१२ यथाहस्तिपदेलीनंसर्वप्राणिपदंभवेत् द
र्शनानिचसर्वाणिकुलमेवतथाप्रिये १३ यथा

जांबूनदेनैवसदृशोलोहमस्तिचेत् तथाचकु
लधर्मेणसमयोन्यःसमोभवेत् १४ यथामरत
रंगिण्यानसमाःसकलापगाः तथैवसमयाःस
र्वेकुलधर्मेणनोसमाः १५ मेरुसर्षपयोर्यद्व
त्सूर्यखद्योतयोरिव तथान्यसमयस्यापिकुल
स्यमहदंतरं १६ अस्तिचेत्त्वत्समानारीमत्समः
पुरुषोस्तिचेत् कुलेनसमधर्मस्तुकथयेत्तत्तदा
प्रिये १७ कुलधर्माद्धिमोहेनयोन्यधर्मेणदुर्मतिः
सकृत्सोपारणंब्रूयात्सोंत्यजोनांत्ययोत्यजः १८
योवाकुलाधिकंधर्ममज्ञानाद्वदतिप्रिये ब्रह्मह
त्यादिकंपापंसमंप्राप्नोत्यसंशयः १९ कुलधर्म
प्रवहणंसमारुह्यनरोत्तमः स्वर्गद्वीपांतरंग
त्वामोक्षरत्नंसमश्नुते २० दर्शनेषुचसर्वेषुचि
राभ्यासेनमानवाः मोक्षंलभंतेकौलेतुसद्यएव
नसंशयः २१ बहुनात्रकिमुक्तेनश्रृणुमत्प्राण
वल्लभे नकौलसमधर्मोस्तित्वांशपेकुलनायि
के २२ योगीचेन्नैवभोगीस्याद्भोगीचेन्नैवयोगवि
त् भोगयोगात्मकंकौलंतस्मात्सर्वाधिकंप्रिये २३

श्री कु ५
9

भोगोयोगायतेसाक्षात्पातकंसुकृतायते मोक्षाय
तेचसंसारःकुलधर्मेकुलेश्वरि २४ ब्रह्मेंद्राच्युत
रुद्रादिदेवतामुनिराक्षसाः कुलधर्मेषुस्थिताव
देविमानुषेषुचकाकथा २५ विहायसर्वधर्मा
श्चनानागुरुमतानिच कुलमेवहिजानीयात्
यदीच्छेत्सिद्धिमात्मनः २६ पूर्वजन्मकृताभ्यासा
त्कुलधर्मेप्रकाशते स्वप्नोत्थितप्रत्ययवद्रुपदे
शादिकंविना २७ जन्मांतरसहस्रेषुयावद्धिर्विहि
तात्मनां तान्येवलभतेजंतुरुपदेशोनिरर्थकः २८
शैववैष्णवदौर्गार्कगाणपत्येंदुसंभवैः मंत्रैर्विशु
द्धचित्तस्यकौलज्ञानंप्रकाशते २९ सर्वधर्मेषुच
देवेशिप्रवरावर्त्तकाःस्मृताः कुलधर्मेस्थितायेच
तेसर्वेप्यनिवर्त्तकाः ३० सुराकृततपोदानयज्ञा
तीर्थजपव्रतैः क्षीणाज्ञानान्तराणांदेविकौलज्ञा
नंप्रकाशते ३१ त्वमहदेवदेवेशियस्यतुष्टावुभा
वपि देवतागुरुभक्तस्यकुलज्ञानंप्रकाशते ३२
शुद्धचित्तस्यशांतस्यधर्मिणोगुरुसेविनः अति
गुप्तस्यभक्तस्यकुलज्ञानंप्रकाशते ३३ श्रीगुरो

कुलशास्त्रेषु कौलिकेषु कुलान्वये यस्य भ
क्तिर्दृष्टा तस्य कुलज्ञानं प्रकाशते ३४ सुश्रु
विनयहर्षाढ्यैः सदाचारैर्दृढव्रतैः गुर्वाज्ञा
पालकैर्धन्यैः कुलज्ञानं प्रकाशते ३५ अन
र्हे कुलविज्ञानं न तिष्ठति कदाचन तस्मा
त्परीक्ष्य वक्तव्यं कुलज्ञानं मयोदितं ३६ न
ब्रूयाच्छिवधर्मेन मयोक्तं शिवशासनं आ
ज्ञाभंगं तु यः कुर्याद्देवताशापमाप्नुयात् ३७
अवोध्य समयाचारं कुलधर्मं वदेद्यदि स गु
रुः शापि शिष्यश्च योगिनीनां भवेत्पशुः ३८ बो
धयित्वा गुरुः शिष्यं कुलज्ञानं प्रकाशयेत्
लभेते ताबुभौ साक्षाद्योगिनीवीरमेलनं ३९
अनायासेन संसारसागरं तर्तुमिच्छति कु
लधर्ममिमं ज्ञात्वा मुच्यते नात्र संशयः ४०
कुलधर्ममहामार्गं गत्वा मुक्तिपुरीं व्रजेत्
अचिरान्नात्र संदेहस्तस्मात्कौलं समाचरेत्
४१ कुलशास्त्रमनादृत्य परशास्त्राणि योभ्य
सेत् स करे हेमायसंत्यक्त्वा भिक्षामटति दुर्मे

श्री· कु· ९
10

तिः ४२ विहायकुलधर्मंयः पशुधर्मपरोभवेत्
करस्थंरत्नमुत्सृज्यकाचखंडंसमग्यति ४३ सं
त्यज्यकुलमंत्राणिपशुमंत्रांश्चयोभ्यसेत् सया
न्नराशिमुत्सृज्यपांसुराशिंसजिघ्रति ४४ कु
लान्वयंतिरस्कृत्ययोन्यान्वयमपेक्ष्यते नडा
कादिवत्स्मात्तोमृगतृस्णांभ्रयावति ४५ य
थेंद्रजालजालाभात्तामेवसुखावहाः श्री
कौलादन्यसमयास्तादृशाःकुलनायिके ४६
कुलधर्ममजानन्योमोक्षमिच्छतिदुर्मतिः पा
रावारमपारंसःपाणिभ्यांतर्तुमिच्छति ४७ यो
चान्यदर्शनेभ्यश्चभुक्तिंमुक्तिंचकांक्षति स्वप्न
लब्धधनेनाबधनवान्सभवेद्यदि ४८ शाक्तौ
रजतवद्भ्रांतिर्यथाज्ञायेनपार्वति तथान्य
समयेभ्यश्चभुक्तिर्मुक्तिःप्रकाश्यते ४९ सर्व
कर्मविहीनोपिवर्णाश्रमविवर्जितः कुल
निष्ठःकुलेप्राप्तिभुक्तिमुक्त्योसमाजनं ५०
कुलज्ञानविहीनोपिकुलभक्त्याश्चयोभवेत्
सोपिसद्गतिमाप्नोतिकिंपुनस्तत्परायणाः ५१

कुलधर्मो हतो हंति रक्षितो रक्षति प्रिये पूजितः
पूजयित्वा शुभं तस्मात्तन्न परित्यजेत् ५२ निं
दंतु वाथवाः सर्वैस्त्यजंतु स्त्रीसुतादयः जनाह
संतु मां दृष्ट्वा राजानो दंडयंतु वा ५३ सेवे सेवे
पुनः सेवे त्वामेव परदेवते त्वद्धर्मं नैव मुंचा
मि मनोवाक्कायकर्मभिः ५४ एवमापद्गत
स्यापि यस्य बुद्धिः सुनिश्चिता स तु संपूज्यते दे
वैर्नरो मुक्तः शिवो भवेत् ५५ रोगदारिद्र्यदुः
खाद्यैः पीडितोप्यनिशं शिवे यस्त्वामुपासते भ
क्त्या शाश्वतं पदमाप्नुयात् ५६ जनास्तु वंतु निं
दंतु लक्ष्मीस्तिष्ठतु गच्छतु मृत्युरद्य युगांते।
स्यात्कौलं न परिवर्जयेत् ५७ नार्थलोभान्न च
क्रोधान्न द्वेषान्न च मत्सरात् न कामान्न भयाद्वा
पि कुलं प्राप्य परित्यजेत् ५८ यो ज्ञात्वा नार्चयेये
त्वां तु कुलधर्मं समाश्रितः कांक्षिता ज्ञानमा
त्रेण भूभारेणात्मघातुना ५९ पुलाका इव धा
न्येषु जातास्यथा इव जंतुषु बुद्बुदा इव तोयेषु
ये कौलविमुखा हि ते ६० तरवोपि हि जीवंति

श्री कु० ११

जीवंतिम्रगयपक्षिणः सजीवतिमनोयस्यकुलधर्मे
व्यवस्थितं ८१ कुलज्ञानविहीनस्यदिनान्यायांतियां
तिचसलोहकारभस्त्रेवश्वसन्नपिनजीवति ८२ ग
च्छतस्तिष्ठतोवापिजाग्रतःस्वपतोपिवा कुलेश्वरि
कुलाज्ञस्यतत्पशोरिवजीवति ८३ विद्वानपिच
मूर्खोसौधार्मिकोवाप्यधार्मिकः व्रतस्थोप्यव्रत
स्थोसौयःकौलदिग्दुरवोनरः ८४ जातास्तएवज
गतिजंतवःसाफसीविनः कुलधर्मपराःदेविशे
षाजरडगर्दभाः ८५ सप्तमातुच्यतेसद्भिःकुल
धर्मपरायणः श्वपरंसपरंह्यष्यासमस्यिकृटत्व
चाहृतः ८६ चतुर्वेदीकुलाज्ञानीश्वपचादधमः
प्रियेश्वपचोपिकुलज्ञानीब्रह्मणादतिरिच्यते
८७ गुरुकारुण्यपूतस्तद्दीक्षानिर्धूतकल्मषः कु
लपूजारतोदेविसोयंकौलोनचेतरः ८८ यःकौ
लिकंकुलज्ञानीनपशुपतिनवंदते नपूजयति
पिक्षस्यतकाकस्येवजीवनं ८९ तेवंयाग्रुण्यक
र्मीणस्तेसंतस्तेचयोगिनः येषांभाग्यवतांदे
विकुलज्ञानंप्रकाशते ९० तेशुद्धास्तेमहात्मा

नः कृतार्थास्तेन रोत्तमाः येषामुत्पद्यते चित्ते कु
लज्ञानं मयोदितं ७१ सर्वक्षेत्राभिगमनं सर्वती
र्थावगाहनं यत्सर्वयज्ञकरणं कुलधर्मप्रवेश
नम् ७२ प्रविशन्ति कुलेधर्मं ये वा सुकृतिनो नराः
ते पुनर्जननीगर्भं न विशन्ति कदाचन ७३ प्रसं
गेनापि यः कश्चित्कुलं कुलमितीर्यते कुलं तस्य
कुलं देवि स्वभं चत्वदनुग्रहात् ७४ कुलज्ञस्य कु
लेशानि नानाद्यर्थैः प्रयोजनं कुलज्ञस्यापि चत
था नान्यथर्मैः प्रयोजनं ७५ कुलेपि कुलनिष्ठा
नां कौलिकानां महात्मनां ददामि परमं ज्ञानं स्व
तकालेन संशयः ७६ चिरायासाल्पफलदं को
हं ते समयं जनाः सुखेन सर्वफलदं कौलं को
पि न वेत्यहो ७७ कुलज्ञोपि हि सर्वज्ञो वेदशास्त्र
विवर्जितः वेदशास्त्रागमज्ञोप्यकुलज्ञोप्यज्ञ ए
व च ७८ जानाति कुलमाहात्म्यं त्वद्भक्त एव नाप
रे चकोर एव जानाति नान्यं चंद्रस्य चोरुविं ७९
कुलज्ञ एव तद्वेत्ति श्रुत्वा कुलकथा प्रिये अल्पा
कुल्पा विवर्द्धते ज्योत्स्नया किं समुद्रवत् ८० कुल

ज्ञानेप्रवर्त्तन्तेकौलिकाःसारवेदिनःभृङ्गाः पुष्पान्त
रंत्यक्त्वमेदाद्यामोदसेविनः ८१ मानयन्तिहिसर्वे
ज्ञाःकुलधर्मंनचेतरे शिवःशिरसिधत्तेन्दुंसैंहिके
योगिलत्पहो ८२ अभिज्ञाएवजानन्तिनाभिज्ञाःकु
लदर्शनं जलमिश्रपयःपानंपक्षीकोवेत्तिहंस
वित् ८३ शिवशक्तिमयोलोकोलोकःकौलेप्र
तिष्ठितः तस्मात्सर्वाधिकंकौलःसर्वसाधारणं
कथं ८४ षड्दर्शनानिमेऽङ्गानिपादौकुक्षिःकरौ
शिरः तेषुभेदंतुयःकुर्यात्मदङ्गच्छेदकोहिसः ८५
एतान्येवकुलस्यापिषडङ्गानिभवन्तिहि तस्मा
त्मदात्मकोकौलमहंकौलात्मकःप्रिये ८६ दर्श
नेष्वखिलेष्वेवफलदंत्वेकदैवतं भुक्तिमुक्तिप्र
दंनानाकुलेस्मिन्देवतेप्रिये ८७ कलौधर्मविरु
द्धेपिसिद्धयोगीश्वरेमते कुलंप्रमाणतांयाति
प्रत्यक्षफलदंयतः ८८ प्रत्यक्षंचप्रमाणानांस
र्वेषांप्रवरंप्रिये उपल--वलात्तस्यहृताःसर्वे
कुतार्किकाः ८९ परोक्षेकोऽनुजानातुयात्कस्यकिं
तुभविष्यति यद्वाप्रत्यक्षफलदंतद्देवोत्तमदर्श

नं ९० कुलधर्ममिमंज्ञात्वामुच्यंतेसर्वमानवाः
इतिमत्वाकुलेशानिमयालोकेवगर्हितं ९१
त्वत्कारुण्यविहीनानांकुलज्ञानविरोधिनां
पशूनामनभिज्ञानांकुलधर्मोविगर्हितं ९२
यस्यजन्मांतरेपापाःकर्मवंधोधिकोभवेत् न
तस्यगुरुकारुण्यंकुलज्ञानंनजायते ९३ य
थाधानेवपश्यंतिसूर्यंसर्वप्रकाशकं तथाकु
लंनजानंतितबमायाविमोहिताः ९४ शैववै
ष्णवबौद्धादिदर्शनान्यतिभक्तितः भजंतिमा
नवानित्यंवृथायासफलानिवै ९५ वेदशास्त्रा
गमेप्रोक्तंभोगमोक्षैकसाधनं मूढानिंदंतिहा
हंतमात्स्यैयंत्नवदर्शनं ९६ आमिताश्चमयादे
विपशवःशास्त्रकोटिषु कुलधर्मंनजानंति
वृथाज्ञानाभिमानिनः ९७ पञ्चशास्त्राणिस
र्वाणिमथ्येवकपिजानिहि मूर्खेतरंतुगंत्वे
वहुनायदुरात्मनां ९८ महापापवशान्नृणां
तपश्चर्याभिजायते तेषांहिसद्गतिर्नास्ति
कल्पकोटिशतैरपि ९९ पूर्वमासीपिपापा

त्माकुलेनैवप्रवर्त्तन्ते वार्यमाणोपिपुण्यात्माकुल
मेवावलंबते ९० कुलधर्मेणदेवत्वंदेवाःसंप्रति
पेदिरेमु नियोगीश्वरायक्षासंसिद्धिंपरमांगताः ९१
पशुव्रतादिनिरताःस्तुलमादौभिकाभुवि येकौल
मेवसेवंतेतेमहांतोतिदुर्लभाः ९२ मानवाबहू
वःसंतिमिथ्यातत्वार्थवादिनः दुर्लभोयंकुलेशा
निकुलतत्वविशारदः ९३ यथारोगातुराःकेचि
न्मानवाःकुलनायिके दिव्यौषधंनसेवंतेमहाव्या
धिविनाशनं ४ तद्वापिवर्धनापथ्यकुर्वंतिहिकु
मेषजं तथैवजन्ममरणाकृतिंसंसारिकींक्रियां ५
समाचरंतिसततंतत्कारणविवर्जिताः नभजंते
कुलंधर्मभवबंधविमोचकं ६ यथालवनंचल
सुनेमरीच्यादीन्वणिकुनात् पदार्थान्मानवाःप्री
त्यायाचंतेकुलनायिके ७ सुतवीनपिरत्नानिन
याचंतेहिकिंचन तथैवपशुपूजास्त्राणिकर्मीया
सफलानिच ८ इतिप्रष्ठंतिमूढाहितवमायावि
मोहिताः कुलधर्मप्राकृतंतिभुक्तिमुक्तिफलप्रदं
९ कस्तूरीकर्दमधियाकर्पूरंलवनेछया प्राकं

रंसैकतभ्रांत्यामणिंकाचमणीधिया १० यथादृष्ट्वा
नमत्स्यंतेकस्यमध्येपामराः तथाकौलंनजानं
तितत्प्रसादविवर्जिताः ११ अहोमोहस्यमाहात्म्यं
त्वन्मायाजनितस्यच किंतुवक्ष्यामिदेवेशिमोह
येदमरानपि १२ पेयंमद्यंपलंखाद्यंसमालोक्य
प्रियामुखं इत्येवंचरणंजप्यपरंप्राप्यपरंपदं १३
गुरुकारुण्यलब्धमीदृग्ज्ञानंकुलदर्शने त्वज्ञा
यवजानानातिनतरेभुक्तिमुक्तिदं १४ गुरूपदेशरहि
तानजानंतिहिकेचन मोहयंतिजनान्कोश्चित्स्वयं
पूर्वंविमोहिताः १५ दुराचाररताःकेचिद्वंचयंति
हिपामराः कथंभूतोभवेत्स्वामीसेवकास्तुतथा
विधाः १६ वहवःकौलिकंधर्मंमिथ्याचारेविडंव
काः स्वबुद्ध्याकल्पयंतीत्थंपारंपर्यविवर्जिताः १७
मद्यपानेनमनुजायदिसिद्धिंलभंतिते मद्यपान
रताःसर्वेसिद्धिंयांतिसमीहिताः १८ मांसभक्षण
मात्रेणयदिपुण्यगतिर्भवेत् लोकेमांसाशिनःस
र्वेपुण्यवंतोभवंतिकिं १९ स्त्रीसंभोगेनदेवेशिय
दिमोक्षंव्रजंतितत् सर्वेपिजंतवोलोकेमुक्ताःस्युः

स्त्रीनिषेवणात् २० कुलमार्गप्रतो देवि न मया निंदि
तः क्वचित् आचाररहिता यत्र निंदितास्ते न चेतरे २१
अन्यथा कौलिके धर्मे ह्याचारः कथितो मया विचरंत्य
न्यथा देवि मूढाः पंडितमानिनः २२ कृपाणधारागम
नाद्व्याघ्रवर्णावलंबनात् भुजंगधारणान्नूनमशक्यं
कुलवर्त्तमानं २३ वृथापानं तु देवेशि सुरापानं तदु
च्यते तन्महापातकं ज्ञेयं वेदादिषु निरूपितं २४ अ
नाघ्रेयमनालोक्यमस्पृश्यं चाप्यपेयकम् मद्यं मांसं
पशूनां तु कौलिकानां महत्फलं २५ अमेध्यानि हि
जातीनां मयाप्येकादशैव तु द्वादशं तु सुरामयं सर्वे
षामधमं स्मृतं २६ सुरां तु मलमन्नानां पाप्मा तु मल
मुच्यते तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबे
त् २७ सुरादर्शनमात्रेण कुर्यात्सूर्यावलोकनं त
त्समाघ्राणमात्रेण प्राणायामत्रयं चरेत् २८ अ
ज्ञातुभ्यां भवेत्स्नानं सर्वाङ्गे च सदैव हि ऊर्ध्वं नाभेस्त्रि
रात्रं तु मद्यस्य स्पर्शने विधिः २९ सुरापाने कामकृ
तिं ज्वलंतीं तां विनिःक्षिपेत् मुखेन या विनिर्दग्धेः
स्ततः शुद्धिमवाप्नुयात् ३० मद्यस्पर्शादिदोषस्याप्रा

यश्चिन्नमितिस्मृतं अविधानेनयोहन्यादात्मार्थेप्रा
णिनंप्रिये ३१ निवसन्नरकेघोरेदिनानिपशुरोम
भिः संमितानिदुराचारस्तिर्यग्योनिषुजायते ३२
अनुमंताविशसिताविहंताक्रयविक्रयी संस्क
र्त्ताचोपभोक्ताचखादिताष्टौचतेसमाः ३३ यनेन
क्रियकोहंतिखादिताचोपभोगतः यातकोवधयवं
याभ्यामित्येपत्रिविधोवधः ३४ मांससंदर्शनेकृ
त्वाघृणादर्शनमाचरेत् तस्माच्चविधिनामांसं
मद्यंसेवेकदाचन ३५ विधिवत्सेवितेदेविनरसा
त्वंप्रसीदति नाशयस्यपिविधिनासत्यमेतद्वरा
नने ३६ तृणंवाप्यविधानेनछेदयेन्नकदाचन वि
धिवज्ञाद्विजंवापिहत्वापापैर्नलिप्यते ३७ वह्
नात्रकिमुक्तेनसारमेकंशृणुप्रिये जीवन्मुक्तिसु
खोपायंकुलशास्त्रेषुगोपितं ३८ यन्मुमुक्षोःफ
लंदेविकनकस्यैवशौरमम् कुलस्तोपूर्यवित्स्या
द्वेजनस्तत्वादनुत्तमः ३९ कुलशास्त्राणिसर्वाणि
मयैवोक्तानिपार्वति प्रमाणानिनसंदेहोनहेत
व्यानिहेतुभिः ४० देवताभ्यःपितृभ्यश्चमधुवाता

ऋत्वायते स्वाधिष्ठायमणिपिष्ठायतीरं सर्पिर्मधूदकं ४१
हिरण्यपात्रं मथोः पूर्णमबधनन्तुरु हवं पञ्च सद्योदी
दापनीत्याद्याः प्रमाणं कृतयः प्रिये ४२ इति ते कथि
तं किंचित्कुलमाहात्म्यमंबिके समासेन कुलेशानि
किं भूयः श्रोतुमिच्छसि ४३ इति श्रीकुलार्णवे महा
रहस्ये कुलमाहात्म्यकथनं नाम द्वितीयोल्लासः २
श्रीदेव्युवाच कुलेश श्रोतुमिच्छामि सर्वधर्मोत्तमो
त्तमं ऊर्ध्वाम्नायं च तन्मंत्रमाहात्म्यं वद मे प्रभो १
श्रीभैरव उवाच शृणु देवि प्रवक्ष्यामि यन्मां त्वं परि
पृच्छसि तस्य श्रवणमात्रेण देवता सम्प्रसीदति २
न कस्यचिन्मयाख्यातमितः पूर्वं कुलेश्वरि कथया
मि तव स्नेहादूर्ध्वाम्नायं तव प्रिये ३ वेदशास्त्रपुरा
णानि प्रकाश्यानि सुरेश्वरि शैवाद्याश्चागमाः सर्वे
रहस्यातिरहस्यकः ४ रहस्यातिरहस्यानि कुल
शास्त्राणि पार्वति रहस्यानां रहस्यं च रहस्यमिद
मंबिके ५ ऊर्ध्वाम्नायार्थतत्त्वं हि पूर्णाहंतात्मकं
परं सुगोपितं मया यत्नादिदानीं तत्प्रकाश्यते ६
मम पंचमुखेभ्यश्च पंचाम्नाया विनिर्गताः पूर्वश्च

पश्चिमश्चैवदक्षिणश्चोत्तरस्तथा ७ ऊर्ध्वाम्नायश्चपं
चैतेमोक्षमार्गाःप्रकीर्तिताः आम्नायाःबहवःसंति
ऊर्ध्वाम्नायेननोसमाः ८ सत्यमेतद्वरारोहेनात्रका
र्याविचारणा आम्नायाबहवःप्रमाःचतुराम्नायभे
दजाः ९ अस्मिंतंत्रेमयाख्याताःपूर्वेतैऊलनायिके
चतुराम्नायवेत्तारोवहवाःसंतिपार्वति ऊर्ध्वाम्नाया
र्थतत्वज्ञाविरलावीरवंदिने १० यावंतःपांसवोभू
मौतावंतःसमुदीरिताः एकैकाम्नायजामंत्राभुक्ति
मुक्तिफलप्रदाः ११ उपमंत्राश्चतावंतःशावराःसमु
दीरिताः १२ मयैवकथितास्तेपिलोकानुग्रहकांक्ष
या सर्वेषामपिमंत्राणांदेवतास्तत्फलप्रदाः १३
आवयोरंशसंभूतादेवताःसमुदीरिताः सर्वमंत्रा
नहंवेद्मिनान्योजानातिकश्चन १४ मत्प्रसादेनयः
कोपिवेत्तिमानवकोटिषु एकाम्नायंचयोवेत्ति
समुक्तोनात्रसंशयः १५ किंपुनःचतुराम्नायवे
त्तासाक्षाच्छिवोभवेत् चतुराम्नायविज्ञानादूर्ध्वा
म्नायःपरःप्रिये १६ तस्मात्तदेवजानीयाद्यदीच्छे
त्सिद्धिमात्मनः ऊर्ध्वत्वात्सर्वधर्माणामूर्ध्वाम्नायः

श्री॰ कु॰ १८

16

प्रशासते १७ ऊर्ध्वेनयत्पथःस्वंच ऊर्ध्वाम्नायोयमी
रिताः ऊर्धितत्वात्कुलेशानिखिलसंसारसंकटात्
१८ ऊर्ध्वलोकैकसेव्यत्वादूर्ध्वाम्नायउदीरितः त
स्माद्देवेशिजानीहि भोगमोक्षैकसाधनं १९ सर्वा
म्नायाधिकंपुण्यमूर्ध्वाम्नायंपरात्परं सर्वलोके
षुसर्वेभ्योत्यहंपूज्योयथाप्रिये २० आम्नायेषुच
सर्वेषुऊर्ध्वाम्नायस्तथाप्रिये देवतानांयथावि
ष्णुर्ज्योतिषांभास्करोयथा २१ तीर्थानांतुयथाका
शीसरनदीसरितांयथा पर्वतानांयथामेरुस्त
रूणांचंदनंयथा २२ अश्वमेधःक्रतूणांतुपाषाणा
नांयथामणिः यथारसानांमाधुर्यंलोहानांकांच
नंयथा २३ चतुष्पदांयथाधेनुर्यथाहंसस्तुपक्षि
णां आश्रमाणांयथाभिक्षुर्वर्णानांब्राह्मणोयथा
२४ मनुष्याणांयथाराजावयवानांयथाशिरः
आमोदानांतुकस्तूरीयथाकांचीपुरीषुच २५ त
थैवसर्वमंत्राणामूर्ध्वाम्नायोधिकःप्रिये नाना
जन्मार्जिताचारपुण्यकर्मफलोदयात् २६ ऊर्ध्वा
म्नायविजानीयानान्यथावीरवंदिते यन्यामनु

ष्यलक्षेषुजानातिफलदर्शनम् २७ तेषांलक्षेषुयःक
श्चिदूर्ध्वाम्नायंप्रवेत्तिवैनवेदैर्नागमैःशास्त्रैर्नपुराणै
सविस्तरैः २८ नयज्ञैर्नतपोभिर्वानतीर्थव्रतकोटि
भिः नान्यैरुपायैर्देवेशिमंत्रौघयपुरस्कृतैः २९ नाम्न
योजायतेचोर्ध्वःश्रीमद्गुरुमुखंविना तमेवात्वमये
त्वस्मात्सर्वसंकरुणानिधिं ३० सर्वलक्षणसंपन्नम्
र्ध्वाम्नायार्थकोविदं तस्माद्देविविजानीयादूर्ध्वाम्नायं
कुलेश्वरि ३१ लभन्तेकोटितांसिद्धिंमत्यंसत्यंवरान
ने ऊर्ध्वाम्नायविजानातियःसम्यक्श्रीगुरोर्मुखात्
३२ शास्त्रमार्गेणमनवोजीवन्मुक्तोनसंशयः ईदृशो
ह्येवोर्ध्वाम्नायंयोजानातीहतत्वतः ३३ सवेद्यःसगु
रुःस्वोर्ध्वःसदैवज्ञःसमांत्रिक ससेव्यःसचसंस्तुत्यः
सदृष्टव्यःससात्विकः ३४ सव्रतीसतपस्वीचसोत्र
ष्टातासपूजकः सवेदागमशास्त्रादिसर्वयाविशा
रदः ३५ आचार्य्यःसचमतिमान्सघतिःसचकालि
कः सयज्वःसचपूतात्मासजापीसचसायकः ३६
सयोगीसकृतार्थस्तुसवीरःसचसत्तमः सपुण्या
त्मासर्वज्ञःसमुक्तःसशिवःप्रिये ३७ तत्कुलेपावने

श्री कु॰ १७

देवियन्मातजननीस्मृता तर्पिताबक्कतार्यस्मात्सुक्ता
स्तत्पितरःप्रिये ३८ पूर्णामत्रदंशजाःसर्वेपूज्यास्तन्मि
त्रबांधवाः बहुनेहकिमुक्तेनचोर्ध्वाम्नायपरस्यच ३९
स्मरणंकीर्त्तनंबापिदर्शनंबंदनंतथा संभाषणंच
कुरुतेराजसूयाधिकंफलं ४० यत्रत्रवसतेदेवितत्र
श्रीर्विजयोभबेत् अनामयंस्वद्धिश्चस्वभिद्वंतिरु
पद्रवं ४१ तस्माद्गुरुप्रसादेनचोर्ध्वाम्नायनरोत्तमः
योबेत्तितत्वतोदेविसमेप्रियतमोभबेत् ४२ पूर्वा
म्नायःसृष्टिरूपःस्थितिरूपश्चदक्षिणःसंहारः प
श्चिमोदेविउत्तरानुग्रहोभवेत् ४३ मंत्रयोगंविडःपू
र्वेभक्तियोगंतुदक्षिणं पश्चिमेकर्मयोगंतुज्ञानयो
गंतथोत्तरं ४४ सर्बाम्नायस्यसंकेतोश्चत्वर्बिंशाति
संज्ञितः दक्षिणाम्नायसंकेताःपंचबिंशातिरीरिताः
४५ पश्चिमाम्नायसंकेताःद्वात्रिंशात्समुदाहृताः विद्धः
षड्विंशदाम्नायंसंकेताःश्रीमदुत्तरे ४६ ऊर्ध्वाम्नाय
स्यचैतानिनसंतिकुलनायिके साक्षाद्ब्रह्मस्वरूप
त्वात्तत्किंचित्कर्मविद्यते ४७ ऊर्ध्वाम्नायस्यमाहा
त्म्यमहंबेद्मिनचेतरः मत्तोहात्वंचजानासिसत्यमे

तद्वरानने ४८ ऊर्ध्वाम्नायस्यमाहात्म्यमितिनेक
थितंमया समासेनतुलेशानिमंत्रमाहात्म्यमु
च्यते ४९ इतःपूर्वंमयानोक्तंयस्यकस्यापिपार्वति
तद्वदामितवस्नेहाद्भक्त्याप्राणवल्लभे ५० श्रीप्र
सादपरामंत्रमूर्ध्वाम्नायप्रतिष्ठितं श्रावयोपरमा
कारंयोवेत्तिसशिवःस्वयं ५१ शिवादिक्रिमिपर्यं
तेप्राणिनांप्राणवर्त्तिनां निश्वासोच्छ्वासरूपेणमं
त्रोयंवर्त्ततेप्रिये ५२ वटबीजेयथावृक्षःसूक्ष्मरू
पेणतिष्ठति पराप्रासादमंत्रोपिब्रह्मांडेतुतथा
स्थिता ५३ अनिलेनयविनामेघोयथाकाशेनचे
ष्टिते पराप्रासादमंत्रेणविनालोकस्तथाप्रिये
५४ पराप्रासादमंत्रार्थेप्रोतमेतच्चराचरं अभिन्नो
तत्वतोदेवितालवृन्तेयथानिलः ५५ बीजेंकुरस्ति
लेतैलमग्नौवौष्मंरवौप्रभा चंद्रेज्योत्स्नानलःका
ष्ठेपुष्पेगंधोजलेईवः ५६ शब्देचार्थःशिवेशक्तिः
क्षीरेसर्पिःफलेहविः शर्करायांचमाधुर्यंघनसा
रेचशीतलं ५७ निग्रहानुग्रहौमंत्रेप्रतिमायांचदे
वता दर्पणेप्रतिबिंबंचसमीरेचलनंयथा ५८

श्री कु· १८
18

परा प्रासादमंत्रोयं प्रपंचेपि तथास्थितः सूपकेषु प
दार्थेषु सरसेषु कुलेश्वरि ५९ लवणेन विना स्वादो
यथा भोक्तुर्न जायते परा प्रासादमंत्रेण विना देवि
तथागमे ६० परा प्रासादमंत्रेण ये मंत्रा वान संग
ताः ते फलं न प्रयच्छंति मंत्रशक्तिविवर्जिताः ६१ श्री
प्रासादपरामंत्रं गोपनीयं कुलेश्वरि विचार्यांहेषु
रा नानादर्शनाम्नायभेदजान् ६२ समुद्वीपे देवि मं
त्रान् शास्त्राणि विविधानि च सहस्राद्यादयो देवाः
शास्त्रेषु विविधेषु च ६३ भ्रमंति ते सुमूढाश्च तव मा
या विमोहिताः जायंते च म्रियंते च संसारे क्लेशभा
जिनः ६४ न लभंते हि मोक्षं ते त्वत्प्रसादविवर्जिताः
सद्रूप श्रीगुरौ यस्य दृढभक्तिः प्रजायते ६५ श्रीप्र
सादपरामंत्रं ज्ञात्वा स च विमुच्यते पूर्वजन्मसह
स्रेषु शैवादिसमयोदिनात् ६६ चतुराम्नायजा
मंत्रान् सर्वज्ञसौ भजिष्यंते स पापकंचुकान्मुक्तः
शुद्धात्मा गुरुवत्सलः ६७ श्रीप्रासादपरामंत्रं विज्ञा
नाति न चान्यथा स ब्रह्मविष्णुरुद्रांश्च शक्रादिसुर
पुंगवाः ६८ वसुरुद्रार्कदिक्पालाः मनुचंद्रादयः प्रि

ये मार्कंडेयादिमुनयो वसिष्टादिऋषीश्वराः ६९
सनकाद्याश्च योगीशाः जीवन्मुक्ताः शुकादयः यक्ष
किन्नरगंधर्वसिद्धविद्याधरादयः ७० श्रीप्रासादप
रामंत्रप्रभावात्कामितंफलं प्राप्यमंत्रमिमंनि
त्यंजपन्त्यापिप्राप्नुवन्ति ७१ सामर्थ्यंपूजिताविद्या
तेजःसौख्यमरोगता राज्यंस्वर्गश्चमोक्षश्चपरा
प्रासादजापिनः ७२ रुद्रेंद्रब्रह्मविष्णूनामपि
दुर्लभंयत्तेपदं सर्वकर्मविहीनोपिपराप्रासादमं
त्रवित् ७३ सुखेनयोगतिंयातिनतांसर्वेपिधा
र्मिकाः तस्यचिंतामणिःकामधेनुःकल्पतरुर्गृ
हे ७४ कुबेरःकिंकरःसाक्षात्पराप्रासादजापितः
यथादिव्यरसस्पर्शात्लोहंभवतिकांचनं ७५ प
राप्रासादजापीचपशुःपाशुपतिस्तथा श्रीप्रासा
दपरामंत्रंयोजानातिहितत्वतः ७६ समांचवांच
जानातिवावयोरपिचप्रियः पराप्रासादमंत्रज्ञः
श्वपचोवापिपार्वति ७७ देवतास्थापनेप्राक्तःप्र
तिमादेर्नसंशयः मंत्रमात्रंतुयोवेत्तिपराप्रासा
दसंज्ञकं ७८ श्वपचोवापिमुच्येतकिंपुनस्तद्वि

श्री कु॰ १९

19

प्रानवित् ७५ पराप्रासादमंत्रज्ञोयकरोतियदीच्छ
ति यद्भूतेतन्महेशानितपोध्यानजपोभवेत् ७६
दीक्षापूर्वंकुलेशानिप्रारंपर्यसमन्वितं पराप्रासा
दमंत्रोयंवेत्तिसोहंनसंशयः ७७ चराचरसमेतानि
भुवनानिचतुर्दश पराप्रासादमंत्रज्ञोदेहेतिष्ठंति
पार्वति ७८ दिव्यक्षेत्रंसमादिष्टंसमंताद्दशयोज
ने पराप्रासादमंत्रज्ञोयत्रातिष्ठतिपार्वति ७९ प
राप्रासादमंत्रार्थतत्त्वज्ञाकुलनायिके सुरासुरा
श्चवंदंतेकिंपुनर्मानवादयः ८० पराप्रासादमं
त्रज्ञमनुतिष्ठामिपार्वति सिद्धक्षेत्रनंदीयोगमु
निदेवगणैःसह ८१ शैववैष्णवदौर्गार्कगाणप
त्येंदुसंभवान् सर्वमंत्रान्सजानातिपराप्रासा
दमंत्रवित् ८२ श्रीप्रासादपरामंत्रोजिह्वाग्रेय
स्यवर्तते तस्यसंदर्शनाद्देविश्वपचोपिविमुच्य
ते ८३ ब्राह्मणोवाथ्यंतजोवाशुचिर्वाप्यशुचिःप्रिये
पराप्रासादजापीयःसमर्थोनात्रसंशयः ८४ ग
च्छंतस्तिष्ठतोवापिजाग्रतःस्वपतोपिवा पराप्रासा
दमंत्रोयंदेवेशिनचनिष्फलः ८५ चिरेरोगैकेकफ

लक्षमंत्राः संति सहस्रशः कुलेशामंत्रराजोयं
शीघ्रं सर्वफलप्रदः ८९ पराप्रासादमंत्रोयं सर्व
मंत्रोत्तमोत्तमः जानतोजानतो वापि भजतां काम
दोमणिः ९० शचीन्द्रौ रोहिणीचन्द्रौ स्वाहाग्नी च प्र
भारवी लक्ष्मीन्नारायणौ वाणीधातारौ रात्रिवा
सरौ ९१ अग्नीसोमौ बिंदुनादौ देवि प्रकृतिपूरुषौ
आधाराधेयनामानौ भोगमोक्षौ कुलेश्वरि ९२
प्राणापानौ च शब्दार्थौ प्रिये विधिनिषेधकौ सुख
दुःखादियद्द्वंद्वं श्रूयते दृश्यतेपि वा ९३ सर्वलो
केषु तत्सर्वं मावामेव न संशयः ९४ पुंस्त्रीरूपा
णि सर्वाणि चावयोरेव जानिहि पराप्रासाद
मंत्रोयं तस्मात्सर्वात्मको भवेत् ९५ अरूपं भा
वनागम्यं परब्रह्म कुलेश्वरि निष्कलं निर्मलं
नित्यं निर्गुणं व्योमसन्निभं ९६ अनंतमव्ययं त
त्वं मनोवाचामगोचरं पराप्रासादमंत्रार्थानु
संधानात्प्रकाश्यते ९७ तस्मान्मंत्रमिमं देवि प
राप्रासादसंज्ञकं परतत्वस्वरूपत्वात्सच्चिदानं
दलक्षणात् ९८ शिवशक्तिमयत्वाच्च भुक्तिमु

श्री. क्षिप्रयाननतः सकर्मचापिनिष्कर्मसगुणं चापिनिर्गु
कु. णं ११ श्रीप्रासादपरामंत्रं सर्वमंत्रशिखामणिं
२. जपन्मुक्तिंचमुक्तिंचलभतेनात्रसंशयः १० बहुना
20 त्रकिमुक्तेनसर्वसारंशृणुप्रिये श्रीप्रसादपरामंत्र
समोमंत्रोनविद्यते १ इदमेवपरंज्ञानमिदमेवपरं
जपः इवमेवपरंध्यानमिदमेवपरार्चनं २ इदमेव
परादीक्षाइदमेवपरंतपः इदमेवपरंधर्ममिदमे
वपरंव्रतं ३ अयमेवपरोयज्ञइदमेवपरात्परं इ
दमेवपरंश्रेयः इदमेवपरंफलं ४ इदमेवपरंत
त्वंइयमेवपरागतिः इदमेवपरंगुह्यंसत्यंसत्यंन
संशयः ५ इतिमत्वामनुवरंननिष्ठः स्यात्सदाप्रि
ये आगमोक्तेनविधिनाक्रमपूजापुरःसरं ६ श्री
प्रासादपरामंत्रमष्टोत्तरशतंजपेत् मुच्यतेब्रह्म
हत्यादिमहापापैश्चपंचभिः ७ द्विशतंयोजपेद्दे
विश्रीप्रासादपरामनुं चतुराशीतिलक्षाणांवार
णांचरितैरपि ८ अयोनिजांगचरितैरसंख्याजन
नार्जितैः वार्धकयौवनेबाल्यंजाग्रत्स्वप्नसुषुप्ति
षु ९ कर्मणामनसावाचाज्ञानाज्ञानकृतैरपि म

हापातकसंघैश्च उपपातककोटिभिः ९ मुच्यते
नात्र संदेहः सत्यमेतद्वरानने त्रिशतं यो जपे
द्देवि श्रीप्रासादपरामनुं ११ सर्वेक्रतुषु यत्पुण्य
सर्वदानेषु यत्फलं सर्वव्रतेषु यत्पुण्यं सर्वती
र्थेषु यत्फलं १२ तत्फलं लभते देवि नात्र कार्या
विचारणा चतुःशतं जपेद्यस्तु श्रीप्रासादपरा
मनुं १३ सदा तस्य गृहद्वारे अणिमाद्यष्टसिद्धयः
सेवन्ते नात्र संदेहः सर्वसिद्धिसमन्विते १४ यद्य
न्मनोभिलषितं तत्तत्प्राप्नोत्यसंशयः धर्मार्थका
ममोक्षाश्च साक्षात्तस्य करे स्थिताः १५ सालोक्य
प्रमुखान्देवि लभेन्मुक्तिं चतुर्विधां सत्यमेतन्न
संदेहः साधकः कुलनायके १६ जपेत्पंचशतं य
स्तु श्रीप्रासादपरामनुं तत्फलं नैव शक्नोमि क
थितुं कुलनायिके १७ तस्मात्सर्वप्रयत्नेन सर्वा
वस्थासु सर्वदा श्रीप्रासादपरामंत्रं प्रजपेद्भु।
क्तिमुक्तये १८ नास्ति गुर्वधिकं तत्त्वं नाशिवाधिक
दैवतं न वेदादधिका विद्या न कौलाधिकदर्शनं
१९ न कुलादधिको ज्ञानी ज्ञानाद्धामाधिकं सुखं

श्री॰
कु॰
२१
21

नाष्टाष्टकाधिकापूजा न हि मोक्षाधिकं फलं २॰ श्रीप्रा
सादपरामंत्रादधिकं नैव विद्यते इदं सत्यमिदं सत्य
मिदं सत्यं वसंशयः २१ श्रीप्रासादपरामंत्रमाहात्म्य
मिव वर्णितं न शक्नोमि वरारोहे कल्पकोटिश
तैरपि २२ गिरौ सर्षपमात्रं तु सागरे चुलकांबु
वत् तथा च मंत्रमाहात्म्यं किंचित्ते कथितं मया २३
तवाम्नायस्य माहात्म्यं श्रीप्रासादपरामतं इति ते
कथितं देवि किंभूयः श्रोतुमिच्छसि २४ इति श्रीकु
लार्णवे महारहस्ये ऊर्ध्वाम्नाय मंत्रमाहात्म्य वर्ण
नं नाम तृतीयोल्लासः ३ श्रीदेव्युवाच ॐ कुलेशश्रो
तुमिच्छामि श्रीप्रासादपरात्मकं मंत्रराजं वदेशा
न न्यासध्यानादिभिः सह १ श्रीईश्वर उवाच शृण
देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि तस्य श्रवण
मात्रेण शिवाकारः प्रजायते २ इतः पूर्वं मया नो
क्तं मंत्रोयं यस्य कस्य चित् तव स्नेहाद्वदाम्यद्य शृ
णु मत्प्राणवल्लभे ३ अनंतकोटि भुवन विंड विंड
सुगान्वितः श्रीप्रसादपरो मंत्रो भुक्ति मुक्ति फलप्र
दः ४ परा प्रसादमंत्रस्तु समादिर्दक्षः कुलेश्वरि प्र

काशानंदरूपत्वात्प्रत्यक्षफलदानतः प्रसन्नवि
त्तरम्यत्वात्प्रसिद्धार्थनिरूपणात् प्राकृतायप्र
शमनात्प्रपन्नार्तिनिवारणात् ६ प्रसादकरणा
च्छीघ्रंप्रसादमतुलीरितः परतत्त्वस्वरूपत्वात्पर
मार्थप्रकाशनात् ७ परमानंदजननात्परमैश्व
र्यकारणात् परोक्षफलदानाच्चपरयमेनि
दर्शनात् ८ परत्वात्सर्वधर्माणां परा मंत्रइतीरि
तः कुलमंत्रमिदंदेविन्यासात्पूर्णंवदामिते ९
अथप्रातःसमुत्थायगुरुदेवात्मचिंतनं कस्यन्मू
लेपुष्कृत्वाचकुर्याद्विण्मूत्रमोचनं १० शौचास्यशो
धनंस्नानंसंध्यातर्पणमाचरेत् पक्षांतेद्वारयजनं
विघ्नत्रयनिवारणं ११ पूजास्थानप्रवेशश्चतथा
समुपवेशनं देविपूजागृहध्यानंशिवादिगुरु
वंदनं १२ आसनेमणपक्षेत्रपालवंदनमीश्व
रि पादुकास्मरणंचैवदीपनाथार्चनंप्रिये १३ क
रांगशोधनंप्राणायामःसब्रह्मरंध्रके दिग्बंधनं
चतुर्युग्मंचविदिग्युक्तांचमातृकां १४ दशप्रकार
मूलाख्यालिपिकामादिसंज्ञिकं षडदीर्घमूलवी

श्री
कु
२२
22

जेनषडंगानिचपार्वति १५ पंचब्रह्माणिचतथावां
गुलिन्यासमेवच आधारशक्तिमारभ्यपीठमंत्रां
तमंबिके अंतःषोढांकुलेशानिकुर्यात्पूर्वोक्तव
र्त्मनामहाषोढाह्वयंन्यासंततःकुर्यात्समाहितः
वक्ष्यमाणेनविधिनादेवताभावसिद्धये यस्यक
स्यापिनैवोक्तंतवस्नेहाद्वदाम्यहं १८ प्रपंचोभुव
नोमूर्तिमंत्रदेवतमातरः महाषोढाह्वयोन्यासः
सर्वन्यासोत्तमोत्तमः १९ तत्रादौपरमेशानिप्रपं
चन्यासउच्यते प्रपचद्वीपजलधिगिरिपत्तनपी
ठकाः क्षेत्रंवनाश्रमगुहानदीचत्वरकोद्भिजाः स्वे
दजांडजरायुजाश्चप्रोक्तोदेविषोडश २१ श्रीमाया
कमलाविष्णुवल्लभापद्मधारिणी समुद्रतनया
लोकमाताकमलवासिनी २२ इंदिराचमहामा
यातथानारायणप्रिया सिद्धलक्ष्मीराजलक्ष्मी
र्महालक्ष्मीरितीरितः शक्तयस्तुप्रपंचानांस्वरा
णामधिदेवता लवस्त्रुटिःकलाकाष्टानिमेषः
श्वासएवच २४ घटिकाचमुहूर्तश्चप्रहरोदिव
सस्तथा संध्यारात्रिःस्तिथिश्चैववारोनक्षत्रमेवच २५

योगश्चकरणंपद्मैमासोराशीस्तथा अयनंच
वत्सरयुगंमप्रलयाःपचविंशतिः २६ आर्योमाचं
डिकादुर्गाशिवापर्णाबिकासती ईश्वरीशांभवी
शानीपार्वतीसर्वमंगला २७ दाक्षायनीहैमवती
महामायामहेश्वरी २८ मृडानीचैवरुद्राणीसर्वा
णीपरमेश्वरी कालीकात्यायनीगौरीभवानीच
समीरिताः शक्तयःस्थुलंवादीनांस्पर्शानामदि
देवता २९ पंचभूतानितन्मात्रकर्मज्ञानेंद्रिया
निलः गुणांतःकरणावस्थायात्रदोशादशेरिताः
ब्राह्मीवागीश्वरीवाणीसावित्रीचसरस्वती गायत्री
वाक्प्रदापश्चाच्छारदाभारतीप्रिये ३१ वियात्मि
कापंचभूतव्यापकानामथीश्वरी त्रितारमूल
विद्यांतेमातृकाक्षरतःपरं ३२ वदेत्प्रपंचरूपायै
श्रियैनमइतिक्रमात् प्रपंचादिभिराद्योज्यवर्णे
शक्तीर्नियोजयेत् ३३ मातृकान्याससंप्रोक्तस्था
नेषुपरमेश्वरि त्रितारमूलसकलंप्रपंचःस्यात्
स्वरूपकः ३४ आद्यैपरांबादेव्यैचनमोत्काव्याप
कंन्यसेत् प्रपंचन्यासएवंस्याद्भुवनन्यासउच्यते ३५

श्री· त्रितारमूलमंत्रांते ग्रं ग्रां इं चातलं वदेत् लोकं च नि
कु लयं चैव पातकोटिपदं ततः ३८ गुल्फाद्ययोगिनीमू
२३ लदेवतांते सुप्रिये वतं देहाधारशाक्तं वा देवेश्यस्या
23 दयोन्यसेत् ईं ऊं ऊं वितलं लोकं गुल्फान्तरमनुत्तकं
शोधं च पूर्ववत्प्रोक्तं गुल्फयोर्विन्यसेत्प्रिये ॠं ॠं लृं
सुतलं वापि गुल्फं चाप्यनसंज्ञकं शोधं च पूर्ववत्प्रो
क्तं जंघयोर्विन्यसेत्प्रिये ३९ लृं एं ऐं महातलं च
महागुल्फं स्वतंत्रकं शोधं च पूर्ववत्प्रोक्तं देवि जा
न्वोश्च विन्यसेत् ४० ओं औं तलातलं परमगुल्फं चे
च्छाभिधानकं शोधं च पूर्ववत्प्रोक्तं वोर्वोर्देवेशि वि
न्यसेत् ४१ अं अः रसातलं चैव रहस्यं ज्ञानसंज्ञकं
शोधं च पूर्ववत्प्रोक्तं गुह्यदेशे च विन्यसेत् ४२ कव
र्गमितिपातालं स रहस्यांतरं क्रिया शोधं च पूर्वव
त्प्रोक्तं मूलाधारे न्यसेत्प्रिये ४३ चवर्गं भूरतिरह
स्यं च श्रीडाकिनीमपि शोधं च पूर्ववत्प्रोक्तं स्वाधि
ष्ठाने न्यसेत्प्रिये टवर्गं भुवरस्य महारहस्यं राकि
णीमपि शोधं च पूर्ववत्प्रोक्तं नाभिदेशे न्यसेत्प्रि
ये ४४ तवर्गं स्वश्च परमं रहस्यं लाकिनीमपि शो

शेषं च पूर्ववत्प्रोक्ता(ः)त्दयेविन्यसेत्प्रिये ४८ पवर्ग
महाग्रन्थं काकिनीमपि चक्रमात् शेषं च पूर्वव
त्प्रोक्ता कंठदेशोह्निपेत्प्रिये ४७ यवर्गं वजनेग्र
न्थं तरं श्रीशाकिनीमपि शेषं च पूर्ववत्प्रोक्तावा
न्तार्यं विन्यसेत्प्रिये शवर्गं तपपश्चातिग्रन्थं श्री
हाकिनीमपि शे· ल· लं हं· स त्पं महाग्रन्थं याकि
नीमपि च प्रिये शेषं च पूर्ववत्प्रोक्ता ब्रह्मरंध्रेत्प
सेत्प्रिये ५· त्रितारमूलमंत्रान्ते चतुर्दशभुवंव
देत् नापि पाये श्रीपरांबादेव्यैस्यव्यापकं न्यसे
त ५१ कृत्वैवं भुवनेन्यासमूर्तिन्यासमथाचरेत्
केशवोनारायणो माधवो गोविंदस्तथा ५२ विष्णु
र्मधुसूदनश्चस्यात्त्रिविक्रमवामनौ श्रीधरश्च
हृषीकेशः पद्मनाभो दामोदरः ५३ वासुदेवः
संकर्षणः प्रद्युम्नानिरुद्धकः अन्तरायोष्टदेशा
नीउग्रोर्थनयनानथा ५४ ऋद्धिः स्वरूपिणील
ल्लालूने दोषैकनायका येकारिणी चोग्रवती औ
र्वकारोजनप्रभा ५५ अस्थिमालायराचेतिसं
प्रोक्ताः स्वरदेवताः पशवः प्राणोविषरुद्रश्चपशु

श्री॰ कु॰ २४
24

पतिश्चोग्रपवच ५६ महादेवस्तथाभीमेशानात
त्पुरुषाह्वयः अघोरसद्योजातश्चवामदेवश्चनी
रिताः ५७ करभद्रावेगबलागरिमादिफलप्रदा
चंटापश्रयराजाणांनंदाचेंद्रयरास्स्मृताः ५८ छंदो
मयीजगत्स्थानांऊलब्राततःपरं ज्ञानदाघटंकः
यराटंकारडामरीतिच ५९ ककादीनांटडांतानां
चक्षानांदेवतास्त्रियाः ब्रह्माप्रजापतिर्वेधाःपर
मेष्ठीपितामहः ६० वियानाचविरिंविश्वस्रष्टा
चचतुराननाः हिरण्यगर्भइत्युक्ताक्रमाद्ब्रह्मा
योदश ६१ हन्निणीरंजनीलक्ष्मीवज्रिणीशाशिया
रिणी घडाधारालयासर्वनायिकाहसितानना:
ललितात्तमाचेतिप्रोक्तायाश्वणीदेवताः त्रितार्
मूलमंत्रांतेस्वरान्विन्यस्यशाक्तिकान् ६३ चतुर्थ्या
नसमायुक्ताव्यस्तकेचाननेन्यसेत् सस्कंधपा
र्श्वकक्षोरुजानुजंघापदेषुच दक्षादिवामपर्य्ये
तंविन्यसेत्परमेश्वरि कृत्वाश्यणीयुतांमंत्रीभवा
दीन्शाक्तिसंयुतान् ६५ पादपार्श्ववाङ्कंठंपं
चवक्त्रेषुविन्यसेत् दशाधारेषुब्रह्मादीन्यादि

शक्तियुतान्न्यसेत् ६६ त्रितारमूलमंत्रान्तो श्रीत्रि
मूर्त्यात्मिकां वदेत् श्रायै परांबा देव्यै च नमस्ता
व्यापकं न्यसेत् ६७ मूर्तिन्यासं विधायेत्थं मंत्रन्या
समथाचरेत् त्रितारमूल ग्रं ग्रौं प्रकलान्तं च को
टिं च ६८ भेदस्त्रवणबाध्यैकान्तरात्माखिलमंत्र
तः ततोधिदेवतायै स्वात्मकलं च फलप्रदे ६९
श्रायै तथैकाकूटेषुर्यं वा देव्यै नमो वदेत् ईं उं
ऊं हिलान्तमादि हितीयं पूर्ववत्परं ७० ॠं ॡं लृ
त्रिलान्तं ब्राह्म्यादिकूटं पूर्ववत्परं लृ एं ऐं च चतु
र्लान्तं चंद्रादि पूर्ववत्परं ७१ ओं औं अं अः पंचलान्त
सूर्यादि पूर्ववत्परं खं जं कं ग्रं स्र लान्तं च वह्निका
दि च पूर्ववत् ७२ जं झं ञं नवलान्तं च ब्रह्मादिपू
र्ववत्परं डं ढं णं दशलान्तं च विश्वादि पूर्ववत्प
रं ७४ तं थं दं एकादशलान्तं शिवादि पूर्ववत्परं
धं नं पं द्वादशलान्तं वाय्वादि पूर्ववत्परं ७५ फं
बं भं त्रयोदशलान्तं लक्ष्म्यादि पूर्ववत्परं मं यं
रं चतुर्दशलान्तं गौर्यादि पूर्ववत्परं ७६ लं
वं शं पंचदशलान्तं डगीदि पूर्ववत्परं मँ हँ लँ

श्री· त्तंःषोडशलत्तंत्रैपुरादिचषोडशा ७७ त्वरात्माखिल
कु· मंत्राद्यदेवतायैतथावदेत् सकलफलप्रदायै
२५ षोडशाकूटेश्वर्यैपुनः श्रंवादेव्यैनमःप्रोक्तोमंत्र
25 न्यासोमहेश्वरि आधारलिंगयोनाभिहृत्कंठास्था
न्तिकान्तके ७९ निरोधिकायामर्द्धेंदौ विंदौश्चैवक
लापदे उन्मन्यादिषुचक्रेषुनादनादांतयोरपि
८० श्रवमंडलदेशेचविन्यसेत्कुलनायिके त्रिता
रमूलमंत्रान्तेसर्वमंत्रात्मिकापदं ८१ आयैपरा
वादेव्यैचहृदयेव्यापकंन्यसेत् मंत्रन्यासंविधा
येस्यंदेवन्यासमथाचरेत् ८२ त्रितारमूलमंत्रां
तेश्रंश्रौसहस्रकोटिषु योगिनीकुलपाह्लांतेसे
वितायैपदंवदेत् ८३ त्रिहृत्संवापदंदेव्यैनम
उच्चरेत्प्रिये ईंईंयोगिप्रतिष्ठांचशेषंपूर्वव
दाचरेत् ८४ उऊतपस्विविद्यांचशेषंपूर्ववदु
च्चरेत् ऋंॠंऋषितथाशांतिंशेषंपूर्ववदुच्चरे
त् ८५ लृंलॄंमुनिशांत्यतीतांशेषंपूर्ववदुच्चरेत्
८६ ऐंऐंरात्रसप्ताह्लांतेगणेपूर्ववदुच्चरे औंऔंः
विद्यायरारक्तांशेषंपूर्ववदुच्चरेत् ८७ कंखंसि

हं महोच्छुष्मां शोषं पूर्ववदुच्चरेत् गं घं सांख्येक
पाली च शोषं पूर्ववदाचरेत् ८८ ङं चं च तथा सरोनि
त्यं शोषं पूर्ववदुच्चरेत् छं जं गंधर्वे विजया शोषं
पूर्ववदुच्चरेत् ८९ झं ञं शल्यकप्राद्यन्ते जिते पू
र्ववदाचरेत् टं ठं पदस्थापराजितां शोषं पूर्व
वदाचरेत् ९० डं ढं किन्नरवामां च शोषं पूर्वव
दुच्चरेत् णं तं च पन्नगेज्येष्ठां शोषं पूर्ववदुच्च
रेत् ९१ थं दं च पितृरौद्रीस्थान् शोषं पूर्ववदा
चरेत् धं नं गणेशमायां च शोषं पूर्ववदुच्चरेत्
पं फं भैरवप्राद्यान्ते कुंडली पूर्ववत्परं बं भं वटुके
काली शोषं पूर्ववदुच्चरेत् ९३ मं यं च देत्रप्राद्य
न्ते कालरात्रिं च पूर्ववत् रं लं प्रमथभगवती
शोषं पूर्ववदुच्चरेत् वं शं ब्रह्मा च सर्वेशी शोषं
पूर्ववदुच्चरेत् षं सं विष्णुश्च सर्वज्ञा शोषं पूर्वव
दुच्चरेत् हं लं रुद्रं सर्वकर्त्री शोषं पूर्ववदुच्चरेत्
क्षं चराचरशक्तिं च शोषं पूर्ववदुच्चरेत् ९६ अंगु
ष्ठागुल्फतो वामजानूरुकटिपार्श्वके स्तनकक्षा
करस्कंधकंठमूर्ध्नश्चक्रमात् ९७ दक्षभागादि

श्री
कु॰
२६
26

वामांतं विन्यसेत्कुलनायिके त्रितारमूलमंत्रांते
सर्वदेवात्मिकापदं ५८ आयेपरां वादेव्यै चह्यदं
येव्यापकं न्यसेत् दैवन्यासं वियायेस्यं मातृका
न्यासमुच्चरेत् ५९ त्रितारमूलमंत्रांते कवर्गानं
त कोटिमू चरीऊलंच सहितां ये श्रां ह्नांमंगला
पदं ६० ऐंबादेव्यै ततो ब्रूयात् आ ह्रां ब्रह्माण्य
तः परं ऐंबादेव्यै ततोनंत कोटिमृतऊलेवदेत् १
सहितायततो ऐं ह्नं मंगलनाथाय ऐं वदेत् ह्रंचा
सितांगभैरवनाथाय नमउच्चरेत् २ चवर्गखे
चरीमीलां चर्चिकाचमहेश्वरी वेतालसिंलेचर्चि
कं नेह्नं शेषं च पूर्ववत् ३ टवर्गपातालचरीऊ
हां योगीश्वरी वदेत् कौमारीपिशाचंतंहं वदे
द्योशीशादंडकौ ४ तवर्गेदिक्चरीटां सोहरसि
हांचवैष्णवी अपस्मारं ऊं संहरसिंहक्रोयादिपू
र्ववत् ५ पवर्गसहचरीलूं षोमहदिन्यंवास्यतःप
रंस्याद्वल राक्षसं लूं षंपटेमन्नादिपूर्ववत् यव
र्गस्याज्ञिरिचरीपैंशाकिलिलीनिच ऐंद्राणीचे
टकीपंशाकिलिकिलाकपालिकः ७ शवर्गस्या

हनचरीश्चैवब्रांकालादिराद्रिच चामुंडाप्रेतसंस्थोला
बदेन्यश्चाष्टभीषणी महालक्ष्मीशाकिनीवश्चा
लापश्चाष्टभीषणाः संहारभैरवश्चैवशेषांचपूर्व
वदुच्चरेत् मूलाधारेलिंगनाभिमनाहतविशु
द्धिषु ९ आज्ञाभालतलब्रह्मरंध्रेष्वेवप्रविन्यसे
त्त्रितार मूलमंत्रोच्चैर्मंत्री तेमातृभैरवशाहृतः
११ अधिपायैपरांवादेव्यैनमोव्यापकंन्यसेत् मा
त्रन्यासंकुलेशानिकुर्याद्देवंसमाहितः १२ एवं
न्यस्ततनुर्देविध्यायेदेवमनन्यधीः अमृतार्णव
मध्येयत्स्वर्णद्वीपशोभिते १३ कल्पवृक्षवनां
तःस्थेनवमाणिक्यमंडपे नवरत्नमयश्रीम
त्सिंहासनगतांबुजे १४ त्रिकोणांतःसमासी
नंचंद्रसूर्याग्नितत्प्रभं अर्ध्यांबिकासमायुक्तंप्र
विभक्तविभूषणं कोटिकंदर्पलावण्यंसदा
षोडशवार्षिकं मंदस्मितमुखांभोजंत्रिनेत्रंचं
द्रशेखरं १५ दिव्यांबरस्रगालेपंदिव्याभरणभू
षितं पानपात्रंचचिन्मुद्रांत्रिशूलंडमरुंकरैः १६
विद्यासंसिद्धिविज्ञाणसदानंदमुखेक्षणं महा

षोढोदिताशेषदेवतागणसेविते १८ एवं चेन्द्रो
भुजे ध्यायेदर्धनारीश्वरं शिवं पुंरूपं वा स्मरेद्देवि
स्त्रीरूपं वा विचिन्तयेत् अथवा निष्कलं ध्याये
त्सच्चिदानन्दलक्षणं सर्वतेजोमयं देवि सचराचर
चरविग्रहं १९ ततः संदर्शयेन्मुद्रां सम्यक् परमे
श्वरि योनिलिङ्गं च महाभिहेति मुद्राचतुष्टयं २०
वनमालां महामुद्रां नमोमुद्रामपि क्रमात् य
थाशक्ति जपेन्मूलमन्त्रं श्रीपादुकामपि मूर्धि
संचिन्तयेद्देवि श्रीगुरुं शिवरूपिणं सहस्रदल
पङ्कजे सकलशीतरश्मिप्रभे वराभयकराम्बु
जं विमलगन्धपुष्पाम्बरं प्रसन्नवदनेक्षणं सक
लदेवतारूपिणं स्मरेच्छिरसि हंसगं तदभि
धानपूर्वकं गुरुं एवं न्यासे कृते देवि साक्षात्पर
शिवो भवेत् २५ मन्त्री चात्र न संदेहो निग्रहा
नुग्रहे क्षमः महाषोढाह्वयं न्यासं यः करोति
दिने दिने २६ देवाः सर्वे नमस्यन्ति तं नमामि न
संशयः महाषोढाह्वयं मासं यः करोति हि पा
र्वति दिव्यक्षेत्रे समुद्दिष्टे समन्ताद्दशयोजनं

२८ कृत्वान्याससमिमं देवि यत्र गच्छति मानवः त
त्रस्याद्विजयो लाभः संमानं पौरुषं प्रिये २९ महा
षोढाकृतन्याससत्सदृत्तं यदि वंद ते सममासान्स
सुमाप्नोति यदि ज्ञाता शिवः स्वयं २५ वज्रपंज
रनामानमेवं न्यासं करोति यः दिव्यन्तरिक्षभूशै
लजलारण्यनिवासिनः २९ उद्दंडभूतवेतालदे
वरक्षोग्रहादयः भयग्रस्तेन मनसा नेक्षंते नेतं
कुलेश्वरि ३० महाषोढाह्वयं न्यासं ब्रह्मविष्णु
शिवादयः देवाः सर्वे पि कुर्वंति ऋषियोगिमुनी
श्वराः ३१ बहुनोक्तेन किं देवि न्यासमेतं मम प्रि
ये नाप्युत्रायवेदद्दे विना शिष्याय प्रकाशयेत् ३२
ज्ञात्वा सिद्धिमवाप्नोति रहसि न्यासमाचरेत् अ
स्मात्परतरा रक्षा देवताभावसिद्धिदा ३३ लोके
नास्ति न संदेहः सत्यं सत्यं वरानने ऊर्ध्वाम्नाय
प्रवेशाच्च पराप्रासादचिंतनम् ३४ महाषोढा
परिज्ञानं नाल्पस्य तपसः फलं इति ते कथितं मं
त्रोद्धारन्यासादिकं प्रिये समासेन कुलेशानि
किं भूयः किं भूयः श्रोतुमिच्छसि ३८ इति श्रीकु

श्री. लार्णवे महारहस्ये मंत्रोद्धारन्यासध्यानकथनं ना
कु. म चतुर्थोल्लासः ४ श्रीदेव्युवाच कुलेशश्रोतुमि
२८ च्छामि पुरश्चरणलक्षणं ध्यानाहारादिभेदं च वद
28 मे परमेश्वर श्रीईश्वर उवाच शृणु देवि प्रवक्ष्यामि
यन्मां त्वं परिपृच्छसि तस्य श्रवणमात्रेण मंत्रतत्वं
प्रकाशते २ जपयज्ञात्परो यज्ञो नापरोस्तीह कश्च
न तस्माज्जपेन धर्मार्थकाममोक्षांश्च साधयेत् ३
सर्वबाह्यान्परित्यज्य मंत्रवादं समभ्यसेत् मत्प्रसा
दाद्भवेत्सिद्धिः प्रमादाच्छाश्वतं पदं ४ भोगापवर्ग
संकल्पकल्पवृक्षप्रदो जपः जपध्यानमयं योगं
तस्माद्देवि समाचरेत् ५ आवृत्तबीजदोषाश्च नि
यमातिक्रमोद्भवाः ज्ञानाज्ञानकृताः सर्वे विनश्यं
ति जपात्प्रिये ६ संसारदुःखभूयिष्ठो यश्चेच्छेत्सिद्धि
मात्मनः पंचांगोपासनेनैव मंत्रजापी सुखं व्रजेत्
७ पूजा त्रैकालिकी नित्यं जपस्तर्पणमेव च होमो
ब्राह्मणभुक्तिश्च पुरश्चरणमुच्यते ८ यद्यदंगं वि
हीयेत तत्संख्याद्विगुणो जपः कुर्याद्वित्रिचतुर्थं
च संख्यावासाधकः प्रिये ९ कुर्वीत सांगसिद्ध्यर्थं

तदशक्तोथभक्तितः सचेदंगविहीयेत मंत्रीने
ष्टमवाप्नुयात् १० अत्रैस्तत्त्वविधैर्देविपदार्थैस
हस्मान्वितैः सभोजितेषुविप्रेषु सर्वैर्हिसफ
लंभवेत् ११ सम्यक्सिद्धैकमंत्रस्य पंचांगोपास
नेनच सर्वैमंत्राश्चसिद्ध्यंतितत्प्रभावात्कुलेश्व
रि १२ उपदेशस्यसामर्थ्याच्छ्रीगुरोश्चप्रसादतः
मंत्रप्रभावाद्भक्त्याचमंत्रसिद्धिःप्रजायते १३ सि
द्धमंत्राद्गुरोर्लब्धोमंत्रोयंसिद्धिभाग्भवेत् पूर्वज
न्मकृताभ्यासामंत्रोवाशीघ्रसिद्धिदः दीक्षापूर्वं
कुलेशानिपारम्पर्यक्रमागतम् न्यायलब्धंतु
यन्मंत्रंतस्यसिद्धिर्नसंशयः १४ माससमात्रंजपे
न्मंत्रंभूतलिप्याभिसंपुटम् क्रमोत्क्रमात्सहस्रं
तुतस्यसिद्धोभवेन्मनुः १५ मंडलेप्रजपेन्मंत्रं
मातृकाक्षरसंपुटम् अनुलोमविलोमेनमं
त्रसिद्धिःप्रजायते १६ त्रिषष्ट्यक्षरसंयुक्तंमा
तृकाक्षरसंपुटम् क्रमोत्क्रमसहस्रंतुमासा
त्सिद्धोभवेन्मनुः १७ मातृकाजपमात्रेणमंत्रा
णांकोटिकोटयः उदिताःस्युर्नसंदेहयतस्त

वैंतदुर्लभं २० अनेककोटिमंत्राणिचित्तस्याकुल
कारणं मंत्रंगुरुकृपाप्राप्तमेकंस्यात्सर्वसिद्धिदं
२१ यदृच्छयाश्रुतंमंत्रंस्रावितंचछलेनवा यत्रे
स्थितोवागाथायांनजपेत्तदनर्थकृत् २२ पुस्त
केलिखितान्मंत्रानालोक्यप्रजपंतिये ब्रह्महत्या
समंतेषांपातकंपरिकीर्तितं २३ पुण्यक्षेत्रेनदी
तीरेमहापर्वतमस्तके तीर्थप्रदेशेसिंधूनांसं
गमेपावनेवने २४ उद्यानानिविचित्राणिबिल्व
मूलेतटंगिरेः देवतायतनेकूलेसामुद्रस्यनि
जेगृहम् २५ साधकानांप्रशस्तानिस्थानान्येता
निमंत्रिणां अथवानिवसेत्तत्रयत्रचित्तंप्रसीद
ति २६ सूर्यस्याग्नेर्गुरोरिंदोर्दीपस्यचजलस्यच
गोविप्रकुलवृक्षाणांसन्निधौशस्यतेजपः २७
गृहेशतगुणंविंद्याद्गोष्ठेलक्षगुणंभवेत् को
टिदेवालयेप्रोक्तमनंतंशिवसन्निधौ २८ म्ले
च्छदुष्टमृगव्यालशंकातंकविवर्जिते एकां
तेपावनेनिंदारहितेभक्तिसंयुते २९ सुदेशे
धार्मिकेराष्ट्रेसुभिक्षेनिरुपद्रवे रम्येभक्तजन

स्थानेनिवसेन्नापरंश्रयेत् ३० राजानःसचिवा
राजपुरुषाःप्रभवोजनाः चरंतियेनमार्गेण
नवसेत्तत्रमंत्रवित् ३१ जीर्णदेवालयोद्यानद
ग्धहत्ततलेषुच नदीकूलेचकूटेषुभूछिद्रा
दिषुनोवसेत् ३२ दीपनाथमनत्वायोजपपू
जादिमाचरेत् तत्फलंरक्षणेनेनतस्याया
सफलंभवेत् ३३ वंशाश्मधरणीदारुतृण
पल्लवनिर्मितं वर्जयेदासनंधीमांदारिद्र्यव्या
धिदुःखदं ३४ चित्रकंबलवस्त्राणिसिंहव्याघ्र
मृगाजिनम् कल्पयेदासनंधीमान्सौभाग्यज्ञा
नसिद्धिदं ३५ पद्मस्वस्तिकवीरादिष्वासनेषूप
विश्यच जपार्चनादिकंकुर्यादन्यथाविफलंभ
वेत् द्वादशावर्तयेद्बुद्ध्याप्रणवंतच्चमात्रकम्
मुंचेत्पिंगलयावायुमंतस्थंरेचकंभवेत् ३६ षो
डशावर्तयेन्नारंपूरयेद्वाह्यमारुतम् शनकैरि
डयाविद्वान्पूरकंपरिकीर्तितं ३७ द्वादशावर्त
येन्नारंवायुमध्येचकुंभयेत् शोषयेद्वायुबीजे
नदेहंशोषणमीरितं ३८ पुनश्चपूरयेद्वायुंरे

श्री
कु॰
३॰
30

चयेत्पूर्णकुंभयेत् दहेदनलवीजेन देहं दह
नमीरिते ४० पुनश्च पूरयेद्वायुं रेच्य संपूर्य कुंभ
येत् शिवकुंडलिनीयोगतिःच्छंदामृततयाख्या ४१
आपादमस्तकं देवि प्लावयेत्प्लावनं भवेत् जप
ध्यानं विना गर्भः सगर्भस्तद्विपर्ययात् ४२ अग
मोक्तगर्भसंयुक्तः प्राणायामशताधिकः तपांसि
तीर्थयात्रायामखदानव्रतादयः ४३ प्राणाया
मस्य तस्यैते कलां नार्हंति षोडशीं मानसं वाचि
कं पापं कायिकं चापि यत्कृतं तत्सर्वं निर्दहेच्छी
घ्रं प्राणायामत्रयेण वै ४४ दह्यंते ध्मायमाना
नां धातूनां हि यथा मलाः तथेंद्रियाणां दह्यं
ते दोषाः प्राणस्य संयमात् ४५ प्राणायामविशु
द्धात्मा यद्यत्कर्म करोति हि तत्तत्फलत्यसंदेहः
प्रयत्नेन न वा कृतम् ४६ आगमोक्तेन मार्गेण
न्यासं नित्यं करोति यः देवताभावमाप्नोति मंत्र
सिद्धिः प्रजायते ४७ योन्यासकवचच्छन्नो मंत्रं
जपति ते प्रिये विघ्नान्दृष्ट्वा पलायंते सिंहं दृष्ट्वा
यथा गजा ४८ अकृत्वा न्यासजालं यः केवलं म

जपेन्मन्त्रं सर्वविघ्नैः सबाध्येत व्याघ्रैः स्रगाशि
ष्वर्थिणी ४९ अक्षमाला द्विधा प्रोक्ता कल्पिता
कल्पितेति च कल्पिता मणिभिः क्षमामातृका
स्यादकल्पिता ५० आदिक्षान्ताक्षरात्मेत्रादक्षमा
लेति कीर्तिता अनुलोमविलोमाभ्यां गणयेन्मं
त्रवित्तमः ५१ एकैकमंगुलीभिः स्याद्रेखाभिः
दशाभिः फलम् मणिभिः शतसाहस्रं मालि
न्यानंतमुच्यते ५२ त्रिंशद्भिः स्याद्धनं पुष्टिः स
प्तविंशतिभिर्भवेत् पंचविंशतिभिः मोक्षः पं
चदशाभिचारके ५३ पंचाशद्भिः कुलेशानि
सर्वसिद्धिमुदीरिता: अंगुष्ठेन तु मोक्षार्थी त
र्जनी शत्रुनाशिनी ५४ मध्यमा यत्तदे विद्या ॥
च्छांतिकर्म अनामिका अंगुष्ठतर्जनीद्वंद्वं मो
क्षदं शत्रुनाशने ५५ अंगुष्ठे मोक्षतर्जन्योश
त्रुश्चैव मध्यमा वश्या चानामिका शांतिः
कनिष्ठा स्तंभकारिणी ५६ एतावज्जपिष्या
मीत्यादौ संकल्प्य मंत्रवित् स्थिरासनो जपि
त्वाथ देव्यै मोदकमर्पयेत् ५७ उच्चैर्जपोऽयमः

प्रोक्त उपांशुःमध्यमःस्मृतः उत्तमो मानसो देवि
त्रिविधःकथितोजपः ५८ अतिह्रस्वो व्याधिहे
तुरतिदीर्घस्ततःक्षयः अक्षराक्षरसंयुक्तोजपे
मौक्तिकहारवत् ५९ मनसा यत्स्मरेत्स्तोत्रंवच
सावामनुंपठेत् उभयंनिष्फलंदेविभिन्नभां
डोदकंयथा ६० जातसूतकमादौस्यादन्तेतुमृत
सूतकम् सूतकद्वयसंयुक्तोयोमंत्रःसनसिद्ध्य
ति ६१ आद्यन्तरहितंकृत्वामंत्रमावर्तयेत्प्रिया
सूतकद्वयनिर्मुक्तःसमंत्रःसर्वसिद्धिदः ६३ मं
त्राद्यन्तेचचैतन्यंयोनिमुद्रांनवेत्तियः शतकोटि
जपेनापितस्यसिद्धिर्नजायते ६४ गुप्तवीर्याश्च
येमंत्रानदास्यन्तिफलंप्रिये मंत्राश्चैतन्यसहिताः
सर्वसिद्धिकराःस्मृताः ६५ चैतन्यरहितामंत्राः
प्रोक्तावर्णास्तुकेवलाः फलंनैवप्रयच्छन्तिल
क्षकोटिजपादपि ६६ मंत्रोच्चारेकृतेयादृक्स्व
रूपंप्रथमंभवेत् शतेसहस्रेलक्षेवाकोटिजा
पेनतत्फलम् ६७ गद्गदोक्तिश्चसहसाजायते
नात्रसंशयः सकृदुच्चारितेप्येवंमंत्रेचैतन्यसं

प्रते द्रष्टनेप्रत्ययोयत्रपारंपर्यंतदुच्यते ६९
रुद्धःकूटाक्षरोमुग्धोवद्धोविहस्त्वभेदितः वा
लःकुमारोप्यथवाप्रौढोवृद्धस्त्वगर्वितः ६९
स्तंभितोमूर्छितोमत्तःकीलितःखंडितःप्रिये
मंदःपराङ्मुखश्छिन्नोबधिरोधस्तथेततः ७०
केकरःस्त्वथितःस्तब्धःस्थानभ्रष्टस्त्वपीडितः
निःस्नेहोविकलोधस्तोनिर्वीर्यस्त्वरुकुंठितः ७१
समस्तिरस्कृतोनीचोमलिनस्त्वदुरासदः निः
स्पंदोनिर्जितोदग्धस्त्वपलस्त्वभयंकरः ७२ नि
स्त्रिंशोलिंगितःक्रूरःफलहीनोनिरंशकः नि
र्वीजोभ्रमितःशांतोरणोक्षिप्तोंगहीनकः ७३
जडोरिपुरुदासीनोलज्जितोमोहितःप्रिये स
ष्टेतान्मंत्रदोषांस्त्वयोज्ञात्वाप्रजपेत्प्रिये ७४
सिद्धिर्नजायतेतस्यलक्षकोटिजपादपि कथ्य
तेदशसंस्काराःमंत्रदोषहराःप्रिये ७५ जननं
जीवनंपश्चात्ताडनंबोधनंततः अभिषेकोथ
विमलीकरणाप्यायनेततः ७६ अर्चनंदीपनं
गुप्तिरित्युक्ताःकुलनायिके प्राणोल्लीढाति

शास्त्राणि यथासुनिर्मितानि वै मंत्राश्च स्फूर्तिमा
यांति संस्कारैर्दशभिस्तथा ७७ भैक्ष्यं हविष्यं शा
कानि विहितानि फलं पयः मूलं सक्तु पयोन्यत्र
मिष्टान्येतानि मंत्रिणां ७८ यस्यान्नपानपुष्टांगः
कुरुते धर्मसंचयम् अन्नदातुः फलस्यार्धं कर्तु
श्चार्धं न संशयः ७९ तस्मात्सर्वप्रयत्नेन परान्नं
वर्जयेत्सुधीः पुरश्चरणकालेपि काम्यकर्मस्व
पीश्वरि ८० जिह्वादग्धा परान्नेन करौ दग्धौ प्रति
ग्रहात् मनोदग्धं परस्त्रीभिः कथं सिद्धिर्वरान
ने ८१ मनोन्यत्र शिवोन्यत्र शक्तिरन्यत्र मानतः
न सिद्ध्यति वरारोहे कल्पकोटिशतैरपि ८२
वाचार्थं पठ्यते विद्या परार्थं क्रियते जपः
ख्यात्यर्थं दीयते दानं कथं सिद्धिर्वरानने ८३
धनार्थं गम्यते तीर्थं दंभार्थं क्रियते तपः का
मार्थं देवतायात्रा कथं सिद्धिर्वरानने ८४
अनिस्पेन तु देहेन न्यासं देवार्चनं जपम् हो
मं कुर्वंति ये मूढाः सर्वं भवति निष्फलं ८५
विट्मूत्रोत्सर्गशंकाभिर्युक्तः कर्म ॥

करोतियःजपोर्चनादिकंसर्वमपवित्रंभवेत्प्रिये
८६ मलिनांबरकेशांकोमुखदौर्गंध्यसंयुतः
योजपेत्तंजहात्याशुदेवतातिजुगुप्सितं ८७ आ
लस्यंजृंभणंनिद्रांक्षुतंनिष्ठीवनंभयम् नी
चांगस्पर्शनंकोपंजपकालेविवर्जयेत् ८८
अत्याहारःप्रयासश्चप्रजल्पोनियमाग्रहः ज
नसंगंचलौल्यंचषड्भिर्मंत्रोनसिध्यति ८९
उष्णीषीकंचुकीनग्नोमुक्तकेशोगलावृतः अ
पवित्रोत्तरीयश्चाशुचिर्गच्छन्नोजपेत् ९० जा
ड्यंदुःखंतृणच्छेदंविवादमेवच विहासंदेहजा
ड्यंचजपकालेविवर्जयेत् ९१ शांतःशुचिःमि
ताहारोभूशायीभक्तिमान्वशी निर्द्वंद्वःस्थिरधीः
मौनीसंयुतात्माजपेत्सुधीः ९२ विश्वासास्तिक्य
करुणाश्रद्धानियमनिश्चयैः संतोषोत्सहकाय
मादिगुणैर्युक्तोजपेत्प्रिये ९३ सुगंधपुष्पाभ
रणवस्त्रादिभिरलंकृतः तस्यहस्तागतासिद्धिः
नान्यथाजपकोटिभिः ९४ तन्निहस्तकृतप्राण
स्तच्चित्तस्तत्परायणः तत्पदार्थानुसंधानेक्त

र्वन्मंत्रं जपेत्प्रिये जपाच्छ्रांतः पुनः ध्यायेद्ध्यानाच्छ्रा
न्तः पुनर्जपेत् जपध्यानादियुक्तस्य द्विप्रं मंत्रः प्र
सिद्ध्यति ९८ ईंहग्निरुद्रनवदृवेदार्काशारसा
ष्टस्तु स्वरमान्विषड्डितिथित्रयोदशास्वपिक्रमा
त् लिखेत्षोडशकोष्ठेषु मातृकाक्षरदर्णान् ९७
सिद्धादीन्कल्पयेन्मंत्रीकुर्यात्सिद्धादिभिः क्रमात्
चतुश्चतुर्विभागेन सिद्धादीनाणयेद्बुधः ९९
सिद्धसिद्धो जपात्साध्यो द्विगुणात्सिद्धसाधकः
सिद्धः सुसिद्धोर्धजपात्सिद्धारिर्हंति बांधवान् ९
साध्यसिद्धोति संक्लेशात्साध्यसाध्यो निरर्थकः
साध्यसुसिद्धो भजनात्साध्यारिर्हंति गोत्रजान्
सुसिद्धसिद्धोर्धजपात्तत्साध्यस्तु यथोक्ततः सु
पारणात्सुसिद्धस्तु तदरिर्हंति सेवकान् अरि
सिद्धः सुतं हन्यादरिसाध्यः सुयोषितं तत्सुसि
द्धः कुलं हंति स्वात्मानं हंतितद्विषः २ सिद्धा
र्णाबांधवाः प्रोक्ताः साध्यास्ते सेवकाः स्मृताः सु
सिद्धाः पोषकास्तेयः शत्रवो घातकामताः ध
बांधवानववार्णकाः सुहृद्विषड्दशासेवकाः

योषकारुद्रसप्ताग्निस्थलरष्टार्कचानकाः ५ प्रा
पलोपाद्धषट्प्राज्यरुद्रन्याङ्करुरुः करन् लो
कपालपदः प्रायः कल्पैयोगेषुभेदितः ६ वर्णा
क्रमात्स्वरापात्तरेवत्पंशमतौनदा जन्मसंप
द्विपत्क्षेमप्रत्यरीसाधकोद्वुयाः ७ मैत्रंपरममै
त्रंच जन्मादीनिपुनःपुनः बालंगौरंद्धरंशोणं
श्यामीसोमितिफणिरोष ८ क्रमेणाभेदितावर्णाः
कन्याचेशोदयास्थितः यनश्चात्तबेधुपुत्रमित्र
शत्रुकालत्रकाः ९ मरणंयमेकमीयव्ययाद्वा
दशराशयः नामाद्यक्षरमारभ्ययावन्मंत्रादिव
र्णकं १० त्रिधाकृत्वाहरेर्भिर्भ्याङ्कं नैतद्विपरीत
कं कृत्वाधिकंऋणंज्ञेयंऋणीचेन्मंत्रउत्तमः
११ स्वयंऋणीचेत्तन्मंत्रंत्यजेत्स्वर्वस्मृणीयतः
वाय्वग्निभूर्जलाकाशीः पंचाशल्लिपयःस्मृताः
१२ महीसलिलयोर्मैत्रंमैत्रमनिलयोरपि १३
शात्रवंवैपरित्येनमित्रंसर्वत्रचांबरम् परस्प
रविरुद्धानांवर्णानांयत्रसंगतिः १४ वर्जये
न्नाहषंमंत्रंनाशाक्रन्तकुलेश्वरि एकाक्षरे

तथाकूटे त्रैपुरे मंत्रनायके १५ स्त्रीदत्ते स्वप्नलब्धे
वासिद्धादीन्नैवशोधयेत् नृसिंहार्कवराहाणां
प्रासादप्रणवस्य च १८ सपिंडाक्षरमंत्राणां सिद्धा
दीन्नैवशोधयेत् इति ते कथितं किंचित्पुरश्चरण
लक्षणम् समासेन कुलेशानि किं भूयः श्रोतु
मिच्छसि इति श्रीकुलार्णवे महारहस्ये पुरश्चरण
विधिर्नाम पंचमोल्लासः ५ श्रीदेव्युवाच कुलेश
श्रोतुमिच्छामि पूजकस्य च लक्षणं कुलद्रव्यादि
संस्कारमर्चनं यदमे शिव १ श्रीईश्वर उवाच शृ
णु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि तस्य श्रव
णमात्रेण स्तूयते देवदानवैः २ निरस्तपातका
यत्र मानवाः पुण्यकर्मिणः कुलज्ञानस्य संपन्ना
भजंते त्वां दृढव्रताः ३ दीक्षाभिषेकसहितो वेद
शास्त्रार्थतत्त्ववित् देवतागुरुभक्तश्च नियमा
त्मार्चनप्रियः कुलागमरहस्यज्ञो देवताराधनो
त्सुकः गुरूपदेशसंयुक्तः पूजयेत्कुलनायिके ४
शुद्धात्मा चातिसंतुष्टः क्रौर्यलौल्यविवर्जितः ५
शुव्रतादिविमुखः सुमुखस्तर्पयेत्प्रिये ६ सदा

पुंसः कृतार्थस्य कालेन बहुनापि प्रिये मत्प्रसादेन
भूयाच्छ्रेष्ठभक्तिसमागमः ७ तदूर्ध्वं तर्पणां कु
र्याद्द्रव्यैः श्रीभैरवोदितैः गुरूपदेशविधिना चान्य
थापतनं भवेत् ८ मंत्रयोगेन देवेशि कुर्याच्छ्री
चक्रपूजनम् तदहं च त्वया सार्धं गृह्णामि स्व
यमादरात् ९ भैरवोऽहमिति ज्ञात्वा सर्वज्ञोऽहं
गुणान्वितः इति संचिंत्य योगीन्द्रः कुलपूजां स
माचरेत् १० इत्यादिलक्षणोपेतः कौलिको निय
तव्रतः यस्तां समर्चयेद्देवि भुक्तिमुक्त्योः सभा
जनं एकांते विजने रम्ये देशे बाधाविवर्जिते
सुखासने समासीनः प्राङ्मुखो वाप्युदङ्मुखः १२
समन्ताद्व्योममणिदीपे कल्पवृक्षवनोज्ज्वले वज्र
प्राकारसंदीप्ते स्मरेत्माणिक्यमंडपं १३ पुष्पमा
लावितानाढ्यप्रच्छन्नपटसंवृते कर्पूरदीपभा
स्वते धूपामोदसुगंधिते १४ तन्मंडयस्यमात्मा
नं ध्यात्वानाकुलचेतसा श्रीगुर्वनुज्ञया देवि कु
लपूजां समाचरेत् १५ स्नात्म स्थानमनुद्रव्य दे
वशुद्धिश्च पंचमी यावन्न कुरुते देवि तावद्देवा

श्री
कु
३५
35

चैनेनहि १६ तस्मात्तत्त्वसंशुद्धिः प्राणायामादि
भिः प्रिये षडंगाद्यविलन्यासैरात्मशुद्धिरुदीरि
ता: १७ संमार्जनानुलेपाद्यैर्दर्पणोदरवत्कृते वि
तानधूपदीपादिपुष्पमालाभिशोभिते १८ पंचा
वर्णरजश्चित्रैस्थानशुद्धिरितीरिता यथिता मा
तृकावर्णैर्मूलमंत्राक्षराणि च १९ क्रमोत्क्रमत्रि
रावृत्तिर्मंत्रशुद्धिरियंभवेत् पूजाद्रव्याणि संप्रो
क्ष्यमूलास्त्राभ्यां विधानवित् २० दर्शयेद्धेनुमु
द्रांच द्रव्यशुद्धिः प्रकीर्तिता पीठे देवं प्रतिष्ठाप्य
सकलीकृत्यमंत्रवित् मूलमंत्रेणदीपित्वामा
लिन्याचौदकेनच त्रिवारं प्रोक्षयेद्धिद्वान् देवशु
द्धिरियंप्रिये पंचशुद्धिविधायेत्थंपश्चाद्यजन
माचरेत् सापूजासफलाज्ञेयाचान्यथानिष्फला
भवेत् २३ मंडलेनविनापूजाविफलाकथिता
प्रिये तस्मान्मंडलमालिख्यविधिवत्तत्र पूज
येत् २४ अखंडमंडलाकारं विश्वं व्याप्य विवस्थि
तं त्रैलोक्यंमंडितं येन मंडलं तत्सदाशिवे २५
प्रोयानंचतुरस्रंस्यात्कामरूपंत्रवतले जालेय

रमर्थं चेदं च अखण्डं पूर्णगिरिर्भवेत् २८ अभ्यर्च्य
मंडले पंचाधारान्संस्थापयेत्क्रमात् शंखमर्घ्यं
भोगपूजाबलिपात्राणि पंचव स्वदक्षिणादिवा
मांतस्थाप्याभ्यर्च्य सर्वेन च संपूर्य मंत्रपूतेन कु
लेश्वरि विधान वित् २७ तत्र माघप्रमाणं म
त्स्यमांसं च निःक्षिपेत् नष्टैः पर्युषितैश्छिष्टैर्ड
र्गन्धैर्गन्धवर्जितैः २९ हेतुभिः पानपात्रेस्थैस्त
र्पणं निःफलं भवेत् स्वादिष्टैश्च मदिष्टैश्च हृ
द्यैरमृतसन्निभैः मनोहरैर्मंहेशानि तर्पणं
सफलं भवेत् असंस्कृतामरापापा कलहव्या
धिदुःखदा ३१ आयुःश्रीकीर्तिसौभाग्यधर्मवि
द्यादिनाशिनी सुसंस्कृतामरारोगदुःखापद
पहारिणी आयुःश्रीःकीर्तिसौभाग्यधर्मविद्या
दिकारिणी ३३ अमथानरकं यान्ति दाताभोक्ता
न संशयः विनाद्यास्थिवासेन नरस्तैन्न यजेत्प्रि
ये ३४ येस्मरन्ति महामूढास्ते यान्ति दुःखं पदे पदे
नामवेनविनामंत्रं विनामंत्रेणानासवं परस्पर
विरोधत्वात् कथं पूजा भवेत्प्रिये तत्प्रशयति

श्री कु॰ ३८

36

हतिं चज्ञात्वा गुरुमुखाद्यजेत ३८ वीक्षणप्रोक्ष
णध्यानं मंत्रमुद्राविशोधनं द्रव्यं तर्पणयोग्यं
स्या देवताप्रीतिकारकं ३७ अग्निसूर्येंदुमब्रह्म
विष्णोरुद्रेशसच्छिवैः चतुर्नवतिमंत्रैःस्यात्मादि
ग्परमामृतं ३८ अमृतामानदापूषापुष्टिस्तुष्टि
रतिर्धृति शशिनीचंद्रिकाकांतिर्ज्योत्स्नाश्रीःप्री
तिरंगदा पूर्णापूर्णामृताचैवकथिताऊलना
यिके सौम्याःकामप्रदायिन्यः षोडशस्वरजाकलाः
४॰ तपिनीतापिनीधूम्रामरीचिर्ज्वालिनीरुचिः
सुषुम्णाभोगदाविश्वावोधिनीधारिणीक्षमा ४८
कभाद्याववसुदाःसौराड्ढांताद्वादशेरिताः धूम्रा
र्चिरुष्माज्वलिनीज्वालिनीविस्फुलिंगिनी ४२ सु
श्रीःसुरूपाकपिलाहव्यकव्यवहातथा आग्नेया
यादिवर्णोत्थादशधर्मप्रदाःकलाः ४३ सृष्टिरृ
द्धिःस्मृतिर्मेधाकांतिर्लक्ष्मीर्द्युतिःस्थिरा स्थितिः
सिद्धिःरितिप्रोक्ताकचवर्गकलादश ४४ अका
रप्रभवाब्रह्मजाताःसृःसृष्टयेकला जराचपालि
नीशांतिरैश्वरीरतिकामिके ४५ वरदाह्लादि

नाप्रीतिर्दीर्घाः स्युः टतवर्गकाः उकारप्रभवा वि
ष्णुजाताः स्युः स्थितये कलाः ४६ तीक्ष्णा रौद्री भ
या निद्रा तंद्रा क्षुत्क्रोधिनी क्रिया उद्गारी मृत्युरि
त्याप्यवर्गकला दश ४७ मकारप्रभवा रुद्रजा
ताः संहृतये कलाः षवर्गाश्च चतस्रः स्युः पीत
श्वेतारुणासिताः ४८ कलाश्चेश्वरसंजातास्ति
रोधानाय बिंदुजाः निवृत्तिश्च प्रतिष्ठा च विद्याः
शांतिः कुलेश्वरि ४९ इंधिका दीपिका चापि रेचि
का मोचिका परा सूक्ष्मामृता मृता ज्ञाना मृता चा
प्यापिनी तथा ५० व्यापिनी व्योमरूपा च षोडश प्रा
स्वरजाः प्रिये सदाशिवोत्थानादस्थानुग्राहाय
कलाः क्रमात् ५१ प्रथमः प्रकृतेर्हंसः प्रतद्विस्त
रं तनरं त्र्यंबकस्तृतीयो च चतुर्थस्तत्पदाभिधः
५२ विष्णुर्योनिक्रमित्यादिः पंचमः कल्प्यंता मनुः
चतुर्नवतिमंत्रात्मा देवतावाच्य पूजिताः ५३
अत्रया पंच संप्रोक्ताः स्वच्छतारस्य पंचभिः कला
भेदैश्च मिथो युज्यंते ताः पृथक्पृथक् ५४ च
तुर्नवतिसंप्रोक्ता मंत्रास्ते कुलनायिके अखंडे

श्री
कु
३७

37

करस्मानंदकरे परमपात्मनि ५५ स्वच्छंदस्फुरणा
न्मत्तनिये त्वमत्तरूपिणी अकुलस्यामृताकारे
सिद्धज्ञानकरे परे ५६ अमृतत्वं निये त्वस्मिन्वस्तु
नि क्लिन्नरूपिणी तद्रूपिणयैकरस्यत्वं कृत्वा ह्येतत्स्व
रूपिणी ५७ भूत्वा कुलामृताकारं मयि चित्स्फुरणं
कुरु वाग्भवं पावनी भूमिपुष्टि बिंदुसमन्विता ५८
स्थितिसपावकानुग्रहार्थे बिंदुसमलंकृता स्थिराद्वी
शोडसंयुक्ता श्वेतबिंदुसुगान्विताः ५९ अथामृते
पदे ब्रूयात्तत्पश्चादमृतोद्भवे अथामृतेश्वरीसु
क्ता पश्चादमृतवर्षिणी ६० अमृतेस्त्रावयपुगं
स्थितं तोद्ध्वपुष्टिकृत् अमृतेशीमनुःप्रोक्तःप
चत्रिंशाद्भिरक्षरैः ६१ वाग्भवं वदयुग्मं च वाग्वादि
नि च वाग्भवे कामराजं च क्लिन्ने च क्लेदिनि क्लेदये
ति च ६२ महाक्षोभं कुरुयुग्मं कामराजमतःपरे
तार्त्तीयं मोक्षप्राप्तं तेकुरुयुग्मं वदेत्ततः ६३ सा
स्त्रासादपरा वांते सप्तत्रिंशाद्भिरक्षरैः दीपिनीम
नुरित्युक्तः सर्वसिद्धिकरःप्रिये ६४ एताःकला
मातृकां चापि खंडैकादिकात्मनून् अमृतेशीदी

पिंनीचमूलमंत्रमपिक्रमात् ८५ एकद्वित्रिच
तुःपंचद्विचतुर्वारमंत्रिके मंस्पृष्टार्चनपा
त्रंतुपूजयेद्धेतुमुद्रया ८६ पिंडब्रह्मांड सं
भूतेमशेषामवसंभृते आपूरितमहापा
त्रेपीयूषरसमावह ८७ शुद्धद्रव्येणानेना
पिगंयपुष्पान्नैरपि साधकस्यचाविश्वा
सात्सान्निध्यंदेवताभवेत् गवांसर्पिःशरीर
स्थनकरोत्यात्मपोषणं स्वकमरचितेनदंतेषु
नमस्मेवपोषयेत् एवंसर्वशरीरस्थःसर्पि
वत्परमेश्वरः विनाचोपासनादेविनददाति
फलंनृणां ८५ सकलीकृत्यतत्त्वाणांस्तदीया
नीन्द्रियाणिच प्रतिष्ठाप्यार्चयेद्देवमन्यथानि
ष्फलंभवेत् ८८ मंत्रहीनेक्रियोन्यासोमुक्ता
सर्वमंत्रैस्थाप्यात्मानंजयेत्प्रिये ८८ मूर्ध्निश्री
गुरुपंक्तिंचमूलाधारेस्वपादुकां दिक्षोचेवादि
नाथश्चतच्छक्तिश्चसदाशिवः ८९ तत्पत्नीच
स्वस्तस्यभार्यारुद्रश्चतद्वपूः विश्नुश्चतत्प्रि
योब्रह्मातत्कांताह्यादशेरिताः ९० सिद्धोवैम

श्री॰ नकश्चैवसनंदनसनातनौ सनत्कुमारश्चस
कु नत्सुजातस्तारुभूषितः ७१ दत्तात्रेयोरेवत
३८ कोवामदेवस्ततःपरं ततोव्यासःशुकश्चापि
एकादशसमीरिताः ७२ मानवौघेनृसिंह
श्चमहेशोभास्करस्तथा महेंद्रोमाधवोवि
ष्णुःषडेतेपरिकीर्तिताः ७३ नामांतेयोजयेद्दे
विदिव्यौघेपरमंशिवं महाशिवंचसिद्धौघे
मानवौघेसदाशिवं ७४ ततःपीठंसमभ्यर्च्यदे
वीमावाहयेत्प्रिये महापद्मवनांतस्थेकारणा
नंदविग्रहे सर्वभूतहितेमातरेह्येहिपरमे
श्वरि देवेशिभक्तिसुलभेसर्वावरणसंयुते
यावत्त्वांपूजयामीहतावत्त्वंसुस्थिराभव ७७
मंत्रेणानेनचावाह्ययजेद्देवीमनन्यधीः ध्या
त्वामुद्राप्रदर्श्यार्घैर्गंधपुष्पाक्षतादिभिः ७८
चिन्मयस्याप्रमेयस्यनिर्गुणस्याशरीरिणः सा
धकानांहितार्थायब्रह्मणोरूपकल्पना ७९
लिंगस्थंडिलवह्न्यप्सुस्यचीकुड्यपटेषुच मंड
लेफलकेमूर्ध्निहृदिवादशकीर्तिताः ८०

एष्वस्थानेषु देवेशि यजंति परमं शिवं अद्रू
पेद्रूपिणं कृत्वा कर्मकांडरता जनाः ८१ ग
वां सर्वांगगं क्षीरं स्रवेत्स्तनमुखाद्यथा तथा
सर्वगतो देवः प्रतिमादिषु राजते आभिरू
प्याच्च बिंबस्य पूजयाच्च विशेषतः साधक
स्यैव विश्वासात्सान्निध्यं देवता भवेत् ८२
गवां सर्पिः शरीरस्थं न करोत्यात्मपोषणं स्व
कर्मरचितं दत्तं पुनस्तामेव पोषयेत् एवं
सर्वशरीरस्थः सर्पिवत्परमेश्वरः विना चोपा
सनां देवि न ददाति फलं नृणां ८३ सकली
कृत्य तत्त्वाणां तदीयानींद्रियाणि च प्रतिष्ठा
प्यार्चयेद्देवमन्यथा निष्फलं भवेत् ८४ मंत्र
हीनं क्रियाहीनं भक्तिहीनं च यद्भवेत् न हि
साध्यते सर्वं हीनमंगापदं यथा ८५ नियमव्य
तिरेकेण यच्च कर्म करोति यः किंचिदप्यस्य
सफलं सिद्ध्यति क्रमदोषतः ८६ न्यूनातिरिक्त
कर्माणि न फलंति कदाचन यथाविधिकृता
नीह सर्वकर्माणि फलंति हि ८७ तद्विधानक्र

श्री कु॰ ३५

39

तेकमंजपहोमार्चनादिच देवताप्रीतिदंभूया
द्भुक्तिमुक्तिफलप्रदं देवस्यमंत्ररूपस्ययंत्रत्वा
त्तमजानतां कृतार्चनादिकंसर्वंव्यर्थंभवति
शांभवि ५१ यंत्रमंत्रमयंप्रोक्तंदेवताभक्तिरू
पिणी यंत्रेसापूजितादेविसहसैवप्रसीदति
५२ कामक्रोधादिदोषोत्थसर्वदुःखनियंत्रणात्
यंत्रमित्याहुरेतस्मिन्देवःप्रीणातिपूजितः ५३
शरीरमिवजीवस्यदीपस्यस्नेहवत्प्रिये सर्वेषा
मपिदेवानांतथायंत्रेप्रतिष्ठितं ५४ तस्माद्यंत्रं
लिखित्वाथध्यात्वावासाहतिंशिवं ज्ञात्वागुरुमु
खात्सर्वंपूजयेद्विधिनाप्रिये ५५ एकपीठेपृ
थक्पूजांविनायंत्रंकरोतियः रोगीगीत्वमपि
त्यक्तादेवताशापमाप्नुयात् ५६ एकपीठेकुले
शानिस्वस्वयंत्रेपृथक्पृथक् यजेदावरणोपे
तान्देवांस्तत्तद्विधानतः ५७ आवाह्यदेवताम
कामर्चयेच्चान्यदेवतां उभाभ्यांलभतेशापंम
न्त्रीचंचलमानसः ५८ इत्यादिलक्षणंज्ञात्वागु
रुतःशास्त्रतःप्रिये विधानेनार्चयेत्सम्यग्देवता

सुप्रसीदति ५५ षोडशोपचारैस्तु सांगे सा
वरणे शिवे पूजयेन्मूलमन्त्रेण गंधपुष्पाक्ष
तादिभिः ५६ महाषोढोदिताशेषपरिवाराश्च
शांभवी प्रणवादिनमोंतेन तत्तन्नाम्ना समर्च
येत् १ अथागमोक्तमार्गेण तर्पयेदलिबिंदुभिः
अंगुष्ठानामिकाभ्यां तु नखैर्निःशब्दमुत्तमं २
अपात्रस्पंदनस्कंदविधिवत्कुलनायिके सत्क
तर्पणमुत्सृज्य जप्त्वा मूलं च पादुकां ३ अतः
शक्तिमनुस्मृत्य तर्पयेदिष्टदेवताः अंगुष्ठो भै
रवो देवि मध्यमा चंडिका प्रिये ४ मध्यमांगुष्ठ
योगेन तर्पयेत्कुलसंततिं अंगुष्ठानामिका
भ्यां तु वश्यकर्माणि तर्पयेत् ५ तर्जन्यांगुष्ठ
योगेन तर्पयेदभिचारके कनिष्ठांगुष्ठयोगे।
न स्तंभने तर्पयेत्प्रिये ६ एवं संतर्प्य देवेशि कुल
द्रव्यैर्यथाविधिः ७ देवतापुरतो देवि गुरुपंक्ति
च पूजयेत् पंक्तित्रयक्रमेणापि ध्यात्वा सम्यग
न्यथ कराभ्यां चिन्मुद्रासमयुक्तकपालं च द
धतीं प्रसन्नवदनामरुणांशुकमलेपव

श्री. कु. ष.

40

सनौ कृपापूर्णापांगीमकरुणनयनौ बर्बरक
चौ उपेतौ सिद्धौघैर्जयति गुरुपंक्तिः प्रतमतिः
९ एवं संपूज्य धूपं च दीपं नैवेद्यमेव च आर्धवं
पिशितोपेतं भक्ष्याणि विविधानि च कदल्यादि
फलान्यं वतांबूलं च समर्पयेत् ११ इति ते कथितं
देवि कुलाचारस्य लक्षणम् द्रव्यसंस्कारपूजादि
किमन्यच्छ्रोतुमिच्छसि १२ इति श्रीकुलार्णवे म
हारहस्ये द्रव्यसंस्कारादिकथनं नाम षष्ठोल्लासः
६ श्रीदेव्युवाच कुलेश वटुकादीनां बलिं वैशि
ष्ट्यलक्षणं तत्वत्रयं च स्वीकारं वद मे करुणानि
धे १ ईश्वर उवाच शृणु देवि प्रवक्ष्यामि यन्मां त्वं
परिपृच्छसि तस्य श्रवणमात्रेण तत्वज्ञानं प्र
काशते यावन्नो वटुके दद्यात्तावन्नैव कुलेश्व
रि तृप्यन्ति मातरः सर्वाः स्मरणाद्यजनादपि २
वटुकादीन्यजेत्तस्मात्प्रपद्यासवामिषैः तन्मं
त्रविधानेन देवताप्रीतिमाप्नुयात् ३ यत्किंचिद्द्र
व्यसंघातं पूजाभोगार्थहेतुना आनीतं दीयता
मक्षयाद्वेत्रपभुः कुलेश्वरि ४ वटुमंत्रं प्रवक्ष्या

मिश्रणोष्टकुलनायिके येःसमर्चितमात्रेण
सर्वेनपशुपत्तपदकाः ८ तारत्रयंततोदेवीत्र
त्रायवटुकेतिच नाथस्मात्कपिलजटाभारभा
स्वरपिंगलत्रिनेत्रेतिपदंपश्चात्ज्वालामु
खपदंततः इमांपूजांबलिंगृहाणद्वमंपाव
कवल्लभा ९ उक्तोवटुमन्त्रश्चत्वारिंश
द्भिरक्षरैः बलिदानेनसंतुष्टोवटुकःसर्व
सिद्धिदः शांतिंकरोतुमेनित्यंभूतवेताल
सेवितः तारत्रयंततःसर्वयोगिनीभ्यःपदं
वदेत् १० तत्पश्चात्सर्वभूतेभ्यःसर्वभूताधि
पतिच श्मशानीभ्यो डाकिनीभ्यःशाकिनीभ्यस्त
तःपरं ११ त्रैलोक्येतिपदंचैववासिनीभ्यइ
मांवदेत् पूजांबलिंगृहाणयुगंस्वाहांतोयो
गिनीमन्त्रः १२ कथितोयंजलेशानिपंकपं
चाशदक्षरैः याकाचियोगिनीरौद्रासौम्यावा
रतरापरा १३ खेचरीभूचरीव्योमचरीप्रीता
-- मेसदा तारत्रयंवदेत्सर्वभूतेभ्यःसर्वपव
च १४ पश्चाद्भूतपतिभ्योहडक्षःसमदशा

श्री॰ कु॰ ४१

41

क्षैरैः भूतायेविविधाकारा दिव्यभौमान्तरिक्षगाः
१५ पातालतलसंस्थाच शिवयोगेनभाविताः
ब्रवाद्याः सर्वसंयाश्चदंडापाश्चव्यवस्थिताः १६
तर्प्यन्तु प्रीतमनसो भूताः गृह्णन्त्विमां बलितार
त्रयंवदेहेविघुगमंदेवीपदंततः १७ पुत्रयव
टुकनाथायपश्चाडुच्छिष्टहारिणो गृह्णयुग्म
क्षपणकक्षेत्रेपालपदंततः सर्वविघ्नान्पदं
पश्चान्नाशयद्वितयपुनः सर्वोपचारसहिता
मिमांपूजांवलिंवदेत् १८ गृह्णयुग्मंद्विठां
तोयंक्षेत्रपालमन्त्रः प्रियेचतः द्वष्टक्षैरैः प्रो
क्तः सर्वसिद्धिप्रदायकः २० योस्मिन्क्षेत्रेनि
वासीचक्षेत्रपालःस्वकिंकरः प्रीतोयंबलि
दानेनसर्वरक्षांकरोतुमे २१ तारत्रयंवदेदा
यंश्रीप्रासादपरामन्त्रः ह्रींह्रींह्रूंचवुगांताय
भैरवाधिष्ठितायच २२ मन्त्रोप्यानंदतत्पश्चा
ड्दयाभिष्टतःपरं सिद्धार्थ्यपदमाभाष्यपश्चा
दवतरहयं २३ क्षेत्रपालपदंपश्चान्महाप्र
स्रपदंततः वदेद्वटुकनाथेतिदेवीपुत्रप

दंततः मातृपुत्रपदं पश्चात्कुलपुत्रपदं वदेत्
सिद्धिपुत्रपदं चास्मिन्स्थानाधिपतये ततः २५
अस्मिन्ग्रामाधिपतये देशाधिपतये ततः मेच
नादपदं पश्चात्प्रचंडोग्रपदं भवेत् २६ कपालि
भीमतत्पश्चाद्गीर्वाणेति पदं भवेत् स्यात्सर्ववि
घ्नाधिपतये इमां पूजां बलिं वदेत् २७ गृह्णयु
गं ऊरुयुगं गुरु ह्णीयुग्मकं ज्वलयुक्युग
ज्वलयुगं सर्वविघ्नान्निवारय २८ नाशयाहितयं
तां तीतत्पश्चात्स्वाहेति नीरयेत् क्षेत्रपालायवौ
षट्चषषष्ठतरक्षाक्षरैः २९ तारत्रयं वदेत्पश्चा
दमुकक्षेत्रपालच[illegible]राजराजेश्वर इमां पूजां
बलिमतः परं ३० गृह्णयुग्मं हि छंतार्णोरष्टा
विंशातिभिस्स्मृतः अनेन बलिदानेन वटुवर्ग
समन्वितः ३१ राजराजेश्वरो देवो मे प्रसीदतु
सर्वदा पश्चिमे वटुके देह मन्त्ररे योगिनीबलिं
३२ पूर्वे भूतबलिं दद्यात्क्षेत्रपालं च दक्षिणे
राजराजेश्वरं मध्ये पूजयेत्कुलनायिके ३४
अंगुष्ठनामिकाभ्यां तु वटुकस्य बलिः स्मृतः

श्री॰ कु॰ ४२ तर्जनीमध्यमानामिकांगुष्ठैर्योगिनीबलिं ३५ अं
गुलीभिश्च सर्वाभिः कृतो भूतबलिः प्रिये अंगुष्ठ
तर्जनीभ्यां तु क्षेत्रपालबलिं भवेत् अंगुष्ठमध्य
माभ्यां तु राजराजेश्वरस्य च वटुकादीन्समर्च्यै
वं कुलदीपान्प्रदर्शयेत् ३६ ईं घृत्वाकसुपिष्टे
न कुर्याद्धेदाग्रलोन्नतान् दीपान्डमरुकाका
रांस्त्रिकोणान्नतिशोभनान् ३७ कर्षाज्ययाहि
णः कुर्यान्नवसप्ताथ पंचवा अंतस्तेजो वहिस्ते
ज एकीकृत्यामितप्रभो ३८ त्रिध्याटेदेवपरिभ्रा
म्य कुलदीपान्निवेदयेत् समस्तचक्रचक्रेशी
युते देवि नवात्मिके ३९ आरात्रिकमिदं देवि
गृहाण मम सिद्धये कुलदीपान्प्रदर्श्याथ श
क्तिपूजां समाचरेत् ४० स्वशक्तिं वीरशक्तिं वा दी
क्षितां गुरुमार्गिणीं पाययित्वा पिबेन्मद्यमिति
शास्त्रस्य निश्चयः ४१ अदीक्षिताः स्त्रियः कुर्यान्म
यः संस्कारमंबिके मंत्रदीक्षाविधानज्ञः शुद्धा
भवति नान्यथा ४२ तस्मात्सलक्षणां शक्तिं गंध
पुष्पाक्षतादिभिः अभ्यर्च्य देवतावुद्ध्या भोगपा

42

त्रनिवेदयेत् ५२ तदंते कन्यकाश्चापि प्रमदाश्च
मनोहरां संपूज्य देवतां बुद्ध्वा दद्यात्पात्रं पृथक्
पृथक् ५४ अनिवेद्य तु यः शाक्तैः जलं दद्यान्नि(?)वे
दितं पूजितं निष्फलं देवि देवता न प्रसीदति ५५
चंडाली चर्मकारी च मातंगी पुक्कसी तथा श्वपची
खेटकी चैव कैवर्ती विश्वयोषितः ५८ कुलाष्ट
कमिदं प्रोक्तं मकुलाष्टकमुच्यते कौंचुकी शौं
डिकी चापि शस्त्राजीवी च रंजिका गायकी रजकी
शिल्पी कौशिकी च तथाष्टमी मंत्रतंत्रसमायु
क्ताः समयाचारपालिकाः कुमारी वा व्रतस्था वा
योगमुद्रायता पि वा पूजाकाले स्वतः प्राप्ता सा
पूज्या सहजायुतैः ५९ उक्तानां संगतानां भावे चात्र
वर्णिनीं गणैर्यजेत् स्वरूपा तरुणी शांता नानुकूला
मुदिता शुचिः ६० शंकाहीना भक्तियुता गूढशा
स्त्रा पयोगिनी ६१ अलोलुपा सुशीला च स्मिता
स्या प्रियवादिनी गुरुदेवतमंत्रज्ञा सुचित्ता कौ
लिकप्रियौ विमत्सरा विशेषज्ञा देवताराधनोत्सु
का मनोहरा सदाचारा प्राज्ञि रेखा सुलक्षणा ६

छोयाकर्कशास्तब्याकुत्सिताकलहप्रिका ५३ दु
र्वारापरांथीनाभीताक्रुड्डाम्बरालसा निद्रासक्ता
निर्दुर्मेयाहीनांगी व्याधिपीडिता ५४ दुर्गंधा दुःखि
ताम्लुर्वीहृष्टोन्मत्ता रहस्यभित् कृतकीकुत्सिताल
ब्धातिर्लज्जाकलहप्रिया ५५ विरूपोन्मार्गगा दुष्टा
पर्वंयाविकृतानना ईदृशीमंत्रयुक्तो वा शक्ति
योगे विवर्जयेत् ५६ ततोर्चनादिकं सर्वं मंत्रोद
कपुरःसरं ततः पूर्वादिमन्त्रनामेत्री देव्यै समर्पये
त् ५७ तारत्रियमितः पूर्वं प्राणबुद्धितत: परं दे
हधर्माधिकारांते जाग्रत्स्वप्नसुषुप्तिषु ५८ मनसा
च ततो वाचा कर्मणा तत्परं वदेत् हस्ताभ्यां च ततो
पद्भ्यामुदरेण ततः परं शिश्नाच यत्स्मृतं पश्चाद्यदु
क्तं यत्कृतं भवेत् तत्सर्वं ग्रहदेवानेता समर्पितम
स्त्विति ६० स्वाहांतो मनुरित्युक्तः स्विसमत्पदतःप्रिये
तान ततो ज्ञान ततो चापि यन्मया क्रियते शिवे ६१ तव
कृत्यमिदं सर्वमिति मात्वा नमस्व मे एवं संप्रार्थ्य
देवेशी स्तनानत्वातिभक्तितः ६२ प्रधानदेवता
मूर्तौ परिवारान्समुद्धसेत् ततः सावरणां देवी

मुहसेत्स्वस्पदश्चजे ८३ शोधिःकायैसमपर्ण्या
र्थीस्थलंमंत्रेणशोधयेत् स्वाहाकुमारेस्पृड
च्छिष्टचंडालिनदनंतरं ८४ वंदेत्मातंगिसर्वां
तेवर्षांकारिटयुगमकं एकविंशातिभिर्वर्णैः
शोधिकामंत्ररीरितः ८५ मंत्रेणानेननिर्मीलं
शोधिकायैसमर्पयेत् देवीमुच्छिष्टमातंगीध्या
येल्लोकैकमोहिनी ८६ वीणावाद्यविनोदगीत
निरतांनीलांशुकोल्ला सिनीविंबोष्टीनवयाव
काईचरणामाकीर्णनीलालकां ८७ स्यंगी
नवरत्नकुंडलधरांमाणिक्यभूषोज्वलां माते
गींप्राणतोस्मिसास्मितमुखींदेवींशुकश्याम
लां ८८ ततःश्रीगुरुरूपायसाक्षात्परशिवाय
च कराभ्यांपात्रमुद्धृत्यसद्वितीयंसमयेत् ८९
स्वसंप्रदायसंयुक्तैर्वीरैस्सहपूजयेत् स्व
योन्यवंदनंकृत्वापिवेत्तदनुज्ञया ९० स
व्येनोद्धृत्यपात्रेतमुद्रांकृत्वापसव्यतः कथा
विधिद्वितीयेनरहस्यामंत्रमुच्चरन् ९१ पि
शितमाषमात्रेतमध्येचुलुकसम्मितं स्वात्म

श्री॰
कु॰
४४

देहत्रयं तत्त्वत्रयेणाथ विशोधयेत् नरणोल्ला
ससद्भिः प्रसन्नवदनेक्षणः गुरुः शिष्यं समाहू
पदयोस्तत्त्वत्रयं प्रिये शिष्योपायनमादाय गु
ह्वात्माङ्गसमादिकं यथाशक्त्या विनीतात्मा वि
त्तशाठ्यविवर्जितः ७४ प्रणम्य बहिरङ्गांगं प्रवि
श्यान्तःशनैः प्रिये समर्प्योपायनं भक्त्याऽशिवा
य गुरुरूपिणे ग्रथितांगुष्ठकौ कृत्वा करौ मुक्ता
य तर्जनी जानुभ्यामवनिं गत्वा पंचांगप्रणमे
द्गुरुं ७६ वामांगुष्ठानामिकाभ्यां दक्षहस्तं प्रसा
रितं स्पृष्ट्वा विशुद्धहृदयस्तिष्ठेदानतमस्तकः
७७ वामांगुष्ठानामिकाभ्यां शिखायां श्रीगुरुः प्रिये
प्रकृत्याद्यैः पृथिव्यन्तैस्तत्त्वविंशतिभिः शिवे ७८
स्वैः स्वैः शुद्धतत्त्वैश्च वाग्भवेन कुलेश्वरि संयुक्तेना
त्मतत्त्वेन स्थूलदेहं विशोधयेत् ७९ मायादिपु
रुषान्तैश्शुद्धाशुद्धैश्च सप्तभिः तत्त्वैः स्पर्शाद्य
यैर्वर्णैः कामराजेन मन्त्रवित् ८० प्रयुक्तेन विद्यात
त्त्वेन सूक्ष्मदेहं विशोधयेत् शुद्धैः शिवादिविद्या
न्तपंचतत्त्वैश्च व्यापकैः ८१ परया शिवतत्त्वे

नपरदेहं विशोधयेत् षट्त्रिंशत्तत्वसंहितं
मालिन्याबालयाप्रिये ८३ तत्त्वत्रयात्मयेजी
वं सर्वतत्वं विशोधयेत् शोदायेत्रिपदं दद्या
त्स्वद्वितीयमलिंगुरुः ८४ चुलकं गुरुणाद
त्तं शोधयामीतिचोच्चरेत् भक्त्याचावनतः शि
ष्योनिःशङ्केत्रिःपिबेच्छनैः ८५ पाणिभ्यां संस्प
र्शे देहं सर्वतत्वं समुच्चरन् शिरप्रभृतिपादां
तं शुद्धदेहं विचिंतयेत् स्थूलान्तमात्मतत्वं स्या
त्सूक्ष्मं विद्यान्तगोचरम् परांतं शिवतत्वं स्यादि
तितत्वत्रयं जगत् ८६ एवं तत्वत्रयज्ञानं गुरुदो
क्तोनायश्चाचरेत् सजीवन्मुक्त एव स्यादितिशं
करभाषितं ततः स्वीकृत्यचगुरुःशिष्येभ्यः
शेषदो भवेत् आदाय गुरुणादत्तं स्वद्वितीया
मृतं पिबेत् ८८ श्रीगुरुज्येष्ठपुत्राणां पुरतः कु
लनायिके नोपविश्यपिबेन्मद्यमितिशास्त्र
स्यनिश्चयः ८९ पानभेदपरोल्लासप्रमाणस्थि
तिलक्षणं अविज्ञायाचरेद्वस्तु समभवेदापदांप
दं ९० निर्मंत्रेनपिबेन्मद्यं प्रायश्चित्तं विधीयते

श्री॰
कु॰
४५
45

तस्मान्मंत्रविधानेन कर्त्तव्यं कुलनायिके ५१ इ
दं पवित्रममृतं पिवामि भवभेषजं पशुपाश
समुच्छेदकारणं भैरवोदितं ५२ चित्ते स्वातंत्र्य
सारत्वात्तस्यानंदमयत्वतः तन्मयत्वाच्च भावा
नां भावांश्चांतर्हिता रसे ५३ स्वसातंत्र्यविकासा
यस्वरसः स्वेनेपीयते तस्मादिमां सुरां देवी पू
र्णाहंतां पिवाम्यहं ५४ मंत्रेणानेन देवेशि मू
लमंत्रेण मंत्रवित् अनाकुलमनाः कुर्यादलि
पानं शनैः शनैः ५५ स्वात्ममूलत्रिकोणस्थ
कोटिसूर्यसमप्रभे कुंडल्याकृतिविद्रूपेऽङ्गने
द्रव्यसमंत्रकं ५६ अहंतायात्रभरितमिदंता
परमामृतं पराहंतामये वह्नौ होमः स्वीकार
लक्षणं ५७ गुरुदेवतमंत्राणामैक्यं संचिंतये
द्धिया यावदुल्लासपर्यंतं सोपदेशं पिवेत्सुधीः
५८ चरुकं सिद्धिदं प्रोक्तं दीपो ज्ञानप्रदो भवेत्
ज्ञानात्परपदप्राप्तिः कौले त्रितयमीरितं ५९
भोजनांते विषं मद्यं मद्यांते भोजनं विषं अमृतं
तद्धि जानीयाद्यं दत्तं सुरया सह ६० चर्वणेन

श्रुतंपानममृतंकथितंप्रिये चर्वणेनविनापानं
केवलंविषभक्षणं १ पानंतुत्रिविधंप्रोक्तंदिव्य
वीरपशुक्रमैः दिव्यंदेव्यग्रतःपानंवीरंवीरास
नेकृतं २ स्वेच्छयापशुवत्पीतंपाशुपानमिती
रितं भुक्तिमुक्तिप्रदंदिव्यंवीरंमुक्तिप्रदंभवेत्
पशुपानंनरकदंप्रोक्तंपानफलंप्रिये दृष्टिमा
नसवाक्कायेयावन्नचलविभ्रमः ४ तावत्पा
नंप्रकुर्वीतपशुपानमतःपरं यावन्नेंद्रियवैक
ल्यंयावन्नोमुखवैकृतिः ५ तावदेपपिबेद्द्रव्य
मन्यथापतनंभवेत् पूर्णाभिषेकयुक्तानांपा
नंदेविनिगद्यते ६ कराभ्यांपात्रमुद्धृत्यस्मरेत्मू
लेचपादुकां आगलांतंपिबेद्द्रव्यंसमुक्तोनात्र
संशयः ७ पीत्वापीत्वापुनःपीत्वायावत्पततिभू
तले उत्थायचपुनःपीत्वापुनर्जन्मनविद्यते ८
आनंदात्पतनेदेवीमूर्छयाभैरवःस्वयं वमना
त्सर्वदेवाश्चतस्मात्त्रितयमाचरेत् ९ दिव्यपान
रतानांवैयत्सुखंकुलयोगिनां तत्सुखंसार्वभौ
मस्यत्वयस्यापिनविद्यते १० यत्सौख्यंकुलनि

ष्ठानां कुलद्रव्यनिषेविणां त तृप्तौ सौख्यमेव मोक्षः स्या
त्सत्यमेतद्वरानने ११ इति ते कथितं देवि वटु
काद्यादिपूजनं समासेन कुलेशानि किं भूयः श्रो
तुमिच्छसि १२ इति श्रीकुलार्णवे महारहस्ये वटु
काटिजाविधाननाम सप्तमोल्लासः ७ श्रीदेव्युवा
च कुलेश श्रोतुमिच्छामि करुणामृतवारिधे उ
ल्लासभेदं देवेश द्रव्यपात्रादिसंगमे १ वस्तुहास
नकाले च श्रीचक्रस्थितिमेव च चेष्टां कौलिकश
क्तीनां वद मे परमेश्वर श्रीईश्वर उवाच शृणु देवि
प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि तस्य श्रवणमा
त्रेण जायते दिव्यभावना आरंभस्तरुणश्चैव यौ
वनः प्रौढ एव च तदंतश्चोन्मना चानवस्थोल्ला
सः सप्तमः ५ तत्त्वत्रयस्यादारंभः कथितः
कुलनायिके कथितस्तरुणोल्लासस्तरुणास्त्र
स्वमंबिके ५ यौवने मनसः सम्यगुल्लासः क
थितः प्रिये स्खलने दृ॰ मनोवाचां प्रौढ इत्यभि
धीयते ८ समुल्लासपरे चक्रे यदिच्छेत्पात्रमेल
ने सर्वाके प्रौढसमुल्लासे नैव कुर्यात्कदाचन ९

यथाधिकारं तत्रापि कर्तव्यं पात्रमेलनं अदीक्षि
तैरनाचारैरमंत्रज्ञैरदैवतैः ८ क्षुद्रकैः समय
भ्रष्टैर्न कुर्याद्द्रव्यसंगतिः अभिज्ञंमन्यमानैश्च
प्रपंचवञ्चनवारिभिः ९ पशुभिः स्तब्धकर्मस्थैर्न
कुर्याद्द्रव्यसंगतिं स्त्रीदुष्टैर्गुरुघ्नैश्च भक्तिही
नैर्दुरात्मभिः १० कुलोपदेशहीनैश्च न कुर्याद्द्र
व्यसंगतिं पदवाक्यप्रमाणज्ञाः श्रुतिस्तत्वार्थ
वेदिनः ११ कुलधर्मानभिज्ञाश्चेत्तत्संगं वर्जयेत्प्रि
ये स्त्रीपुत्रमित्रं वे धूर्ता स्त्रियानामपि पार्वति स
त्कुले च प्रसूता वा ह्यष्टाः स्वाचारवर्जिताः तत्पूजा
विमुखाः सुश्चेत्तत्संगं वर्जयेत्प्रिये १२ कुलाचा
राननभिज्ञानां संगतिं वर्जयेत्प्रिये अदृष्टापुरुषा
णां च देशान्तरनिवासिनी १३ विना संकेतयोगे
न संगतिं वर्जयेत्प्रिये एकपात्रेण कुर्वीत य
दि साक्षान्महेश्वरः १४ मंत्राः पराङ्मुखा यान्ति
विपदश्च पदे पदे स्वपात्रस्थितहेतुं च न दद्याद्वै ८
रवायच १५ यदि दद्यात्कुलेशानि देवताशाप
माप्नुयात् आसने भोजने पात्रमंबरे श्रादानादि

कं १७ अनभिज्ञैरनार्हैश्च संकरं नैव कारयेत् स्रो
तोभेदेन वा कुर्यात्कौलिकैः पात्रमेलनं १८ पूर्व
दक्षिणयोरैक्यमुदक्पश्चिमयोस्तथा तस्मिन्
क्रमार्चनपरैः वीरैः स्वसदृशैरपि १९ कामिनी
भिश्च तत्कुर्यात्स्रोतसां सचतुष्टये योगीभिर्योगि
नीभिश्च प्रदत्तं पूर्णपात्रकं २० स्वमंत्रपादुकामू
लमंत्रजप्तं पिबेत्प्रिये क्वचित् यदृच्छया प्राप्तमम
लिपात्रं तु भक्तितः २१ आदाय पूर्ववज्ज्ञात्वापि वे
देवि गुरुं स्मरेत् गुरुशक्तिसुतानां तु गुरुज्येष्ठ
कनिष्ठयोः २२ स्वल्पेष्टस्यापि चोच्छिष्टं स्वादेना
न्यस्य पार्वति शाक्तोच्छिष्टं पिबेद्द्रव्यं वीरोच्छिष्टं तु
चैवर्णं २३ आत्मोच्छिष्टं न दातव्यं परकीयं न मा
नयेत् उच्छिष्टं भक्षयेत्स्त्रीणां ताभ्यो नोच्छिष्टम
र्पयेत् २४ चक्रमध्ये तु देवेशि नान्यथा पतनं भ
वेत् कनिष्ठानां स्वशिष्याणां दद्यादुच्छिष्टमंबि
के २५ दद्यात्स्नेहनयोनेभ्यः समभेदापदां पदं
आसवोच्छिष्टमात्रं तु यो वा गृह्णाति मूढधीः २६
स्नेहाल्लोभाद्भयाद्वापि देवताशापमाप्नुयात्

ओड्डोल्लासेञ्जले पश्चान्निक्षिपेद्बलिविसर्जनं २७
पूजागृहाद्बहिः कुर्यात्त्रिकोणं तु गृहान्तरे गंधपु
ष्पाक्षतैः पूज्य ध्यायेद्वह्निभैरवं २८ गदात्रिशू
लडमरुपात्रपाणिं त्रिलोचनं कृष्णाभं भैरवं ध्या
येत्सर्वविघ्ननिवारणं २९ नारत्रयं समुच्चार्य प
श्चाद्वह्निभैरवं एहि मुगं बलिं गृह्ण मुगं फ
ट्स्वाहान्तकः ३० वस्त्रद्वासनमंत्रः स्वाहा विंशति
भिरक्षरैः शान्तिस्तोत्रं पठेत्पश्चात्तर्पयेदलिबिंदु
भिः ३१ जयन्तु देव्या हरपादपंकजं प्रसन्नवा मा
र्गनमोक्षदायकं अनन्तसिद्धान्तमति प्रबोधकं न
मामि वामाष्टकयोगिनीगणं ३२ योगिनीचक्र
मध्यस्थं मातृमण्डलवेष्टितं नमामि शिरसा नाथं
भैरवं भैरवीप्रियं ३३ अनादिघोरसंसारव्याधि
ध्वंसैकहेतवे नमः श्रीनाथवैद्याय कुलौषधप्र
दायिने ३४ आपदो दुरितं रोगाः समयाचारलंघ
नात् ये सर्वे व्यपोहन्तु दिव्यचक्रस्य मेलनात् ३५
आयुरारोग्यमैश्वर्यं कीर्तिलाभः सुविजयः का
न्तिर्मनोरथश्चास्तु पान्तु सर्वाश्च देवताः ३६ संपूज्य

कानांप्रतिपालकानांयतींद्रयोगींद्रतपोधनानां
देशस्यराष्ट्रस्यकुलस्यराज्ञःकरोतुशांतिंभगवान्कु
लेशः ३७ नंदंतुसाधककुलान्यवदर्शिकायेसंप्र
यना खचतुरक्रमहान्वयाये नंदंतुसर्वकुलकौ
लरतापरेयेप्यन्येविशेषपदभेदकशांभवाये ३९
नंदंतुसिद्धगुरवस्ततुक्रमौघजेष्ठानुगाः सम
यिनोवटुकाःकुमार्यः षट्योगिनीप्रवरवीरकुल
प्रसूतानंदंतुभूमिपतयोद्विजसाधुलोकाः ४१
नंदंतुनीतिनिपुणानिरवद्यनिष्ठानिर्म त्सराणि
रूपमानिरुपद्रवाश्चनित्यानिरंजनरतागुरवो
निरीहाः शांताश्चशांतमनसोहतशोकशंका
४३ नंदंतुयोगनिरताःकुलयोगयुक्ताआचार्य
सामयिकसाधकपुत्रकाश्च गावोद्विजायुवतयो
यतयः कुमार्यायमैंभवंतुनिरतागुरुभक्तियुक्ताः
४५ नंदंतुसाधककुलान्यणिमादिनिष्ठाश्चायाः
पतंतुसमयंद्विषयोगिनीनां साशांभवीस्फुरतु
कापिसमाप्तवस्था यस्यांगुरोश्चरणपंकजमे
वलभ्यं ४७ पाश्चक्रमभूमिकावसतयोनाडी

श्रयासंस्थिता याः कायङ्गमरोमकूपनिलया
याः संस्थिता यात्तश्रुङ्छासोर्मिमरुत्तरंगानिल
यानिः श्वासवासाश्रयास्ता देव्योरिपुभक्ष्यभक्ष
णपराःत्वभ्यन्तकोल्लार्चिताः ४८ यादिक्चक्रम
पालकाः क्षितिगतायादेवतास्तोपगा यनिम्न
प्रथिताः प्रभाः शिखिगतायामातरिश्वाश्रयाः
४९ याव्योमान्तमंडलामृतमयायाः सर्वगाः
सर्वदास्ताः सर्वाःजलमार्गपालनपराः शांति
प्रयच्छंतुमे ५० ऊर्ध्वेब्रह्मांडतोवादिविगगन
तलेभूतलेनिस्तलेवा पातालेवातलेवासलि
लपवनयोर्यत्रकुत्रस्थितावा क्षेत्रेपीठोपपी
ठादिषुचकृतपदाधूपदीपादिकेन प्रीतादेव्यः
सदानःकृतविधिबलिनायांतुवीरेंद्रवंद्याः ५१
ब्रह्माश्रीशोषडङ्गोगुहवटुकगणाभैरवाःक्षे
त्रपालाः वेतालादित्यरुद्रग्रहवसुमनुसि
द्धाप्सरोगुह्यकायाः ५२ भूतागंधर्वविद्याध
रऋषिपितृयक्षास्तराहिप्रभूता योगीशाश्चा
रणाकिंपुरुषमुनिवराःश्चक्रगाःपांतुसर्वे ५३

श्री॰ ४९

49

देहस्थाखिलदेवतागजमुखाः क्षेत्राधिपा भैरवाः
योगिन्यो वटुकाश्च यत्तपितरो भूताः पिशाचा ग्रहाः
५७ अन्ये भूचरदिक्चराश्च खचरा वेतालकाश्चेट
काः त्वमाः स्युः कुलपुत्रकस्य पिबतः पानं सदीपं
वरं ५८ सत्यं चेत्कृतवाक्यमेव पितृदेवाः शोभवद्यो
गिनी प्रीतिश्चेत्परदेवता च यदि चेद्वेदाः प्रमाणं
वचेत् शाक्तेयं यदि दर्शनं भवति चेदाज्ञेयमेषा
स्ति चेत् संप्रज्ञापि च कौलिकाश्च यदि चेत्स्यात्त्वेज
यः सर्वदा ६० त्वत्तु मातरः सर्वाः समुद्रा सग
णाधिपाः योगिन्यः क्षेत्रपालाश्च मम देहे व्यवस्थि
ताः ६२ शिवाद्यवनिपर्यन्तं ब्रह्मादिस्तम्भसंयुतं
कालाग्न्यादिशिवान्तं च जगद्यज्ञेन तृप्यतु ६३ प
ठित्वैतत्स्थितपात्रं समुद्रास्य गुरुः प्रिये ततो दद्या
त्तु शिष्याय प्रसादं कुलनायिके ६४ स्वभीष्टचेष्ट
चरणाः प्रौढान्तः परिकीर्तितः प्रौढान्तोल्लास
के देवि मुदिते योगिमण्डले ६५ मातृकामण्डले चै
व चक्रमानन्दयेत्तदा तदारूढेषु वीरेषु कार्यका
र्येन विन्दते ६६ इच्छैस्यैव शास्त्रसंपत्तिरित्याज्ञा

पारमेश्वरि तत्रयत्क्रियते कर्मशुभंवायदिवा
शुभं तत्सर्वदेवताप्रीत्यै जायते सुरसुंदरी ज
ल्पोजल्पफलेनेद्रा समाधिरभिधीयते विक्रिया
पूजनं देवि स्वछंदितं भैरवी बलिः मुक्तिः स्याछक्ति
संयोगः स्तोत्रं तत्कालभाषणं ६९ न्यासोवयव
संस्पर्शः कंडूतिहवनक्रिया वीक्षणंध्यानमी
शानि शयनं वंदनं भवेत् ७० तदुल्लासैकतानो
वायाचेष्टासाचसत्क्रिया कार्याकार्यविचारेन्तु
यः करोतिसपातकी ७१ एतच्चक्रगतावीरावि
ज्ञेयः परयोगिनः येनाप्नुवंतिमनुजाः साक्षाद्भैर
वरूपतां ७२ संबोधकोपशमनं पतनोद्धारवर्त
नं वेणुवीणादिवाद्यंचकवितारचनादिकं ७३ रो
दनं भाषणंपातः समुत्थानं विजृंभनं गमनं वि
क्रियादेवियागश्चाभिधीयते ७४ चक्रेस्मिन्या
गिनीवीरायोगिन्यो मदमंथराः समाचरंतिदेवे
शियथोल्लासं मनोगतं ७५ शनैः पृछंतिपार्श्व
स्थान्विस्मृत्यात्मविवक्षितं नियाययवदनं पात्रं पि
बंतिचवमंतिच ७६ मत्तास्वपुरुषं मत्वा कान्ता

श्री॰
पं॰

ममलंवाते न्नथैवग्रुरुपञ्चापिगाढांतोल्लासमं
युतः ७७ पुरुषः पुरुषंमोहाद्दालिंगत्यंगनांगना
एछंतिस्वपतिंमुग्धाकस्त्वकाहमिमेचके ७८ किं
कार्यंवयमायाताः किमर्थमिहसंस्थिताः उद्याने
किमिदंहन्त गृहेकिंवांगनेकिमु ७९ मुखेसम्प
र्यमदिरांप्रपद्यंतेस्त्रियःप्रियान् उपदंशांस्तुखाद
न्तिह्विपंतिप्रियाननेन ८० गृह्णांत्यन्योन्यपात्रा
णिव्यंजनानिचशोभवि प्सवा शिरसिन्यस्यंतिम
घभांडानियोगिनः ८१ अज्ञानकरतालात्तुस्पष्टा
क्षरगीतकं प्रस्खलत्पदविन्यासंनृत्यंतिकुलश
क्तयः ८२ योगिनीमदमत्ताश्चपतंतिप्रमदोपरि
मदाकुलाश्चयोगिन्यःपतंतिपुरुषोपरि मनोर
थसुसंपूर्णंकुर्वंतिचपरस्परं इत्यादिविविधाश्चे
ष्टाःकुर्वंतिकुलनायिके ८३ विकृतिंमनसोहित्वा
यदोल्लासःप्रवर्तते तदातद्देवताभावंभजंतेयो
गिपुंगवाः कौलिकान्भैरवावेशान्योवानिंदति
मूढधीः तंनाशयंत्यसंदेहंयोगिन्यःकुलनायि
के ८४ ननिंदन्नहसेत्कुप्येद्वक्रेमधुमदाकुले

यतश्चक्रगतंवाचंबहिर्नैवप्रकाशयेत् ८७ तेभ्यो
द्रोहंनकुर्वीतनाहितंचसमाचरेत् भक्त्यासंतर्पये
त्तान्वैगोपयेच्चप्रयत्नतः ८८ चक्रेमदाकुलोदृष्टा
चिंतयेद्देवतांधिया मोदतेवदतेभक्त्यासगच्छेद्यो
गिनीपदे ८९ पश्येद्देवंदिव्यंचक्रंयोभक्त्याकौलि
काप्रिये व्रततीर्थतपोदानयज्ञकोटिफलंलभेत्
९० उन्मनापतनोन्मानमूर्छानचमुहुर्मुहुः उन्म
नाख्येति उल्लासेवक्षेदेवीसमन्विते ९१ विरेतासन्नि
र्यातेपरस्परसमीक्षणौ परब्रह्मानुसंधानकौति
लोकुलनायिके ९२ देहेंद्रियाणांमनसश्चानवस्था
निगद्यते अनवस्थाभिधानेभित्रुल्लासेसप्तमेप्रि
ये ९३ परामंत्रस्वरूपोसौजायतेमूर्छनाभरः मू
र्छानामनिकर्षोस्मिन्मूलेमुक्तःपरंविदुः ९४ अं
तर्लक्ष्योवहिर्दृष्टिर्निमेषोन्मेषवर्जिता एतासा
शांभवीमुद्रासर्वतंत्रेषुगोपिता ९५ यद्यात्खे
चरीमुद्राशिवस्यसमयायिनी सद्योजीर्णासदा
हेनासामरस्यचचमत्कृतिः ९६ अनयोल्लासितो
वीराःशिवपवनसंश्रयः नाकिंचिदपिजानाति

श्री॰
५१
51

स्वात्मध्यानपरायणाः ९७ तदायत्परमं सौख्यं मनो
वाचामगोचरं स्वयमेवानुभवति शार्करादीरथानव
त् ईदृशं तादृशं सौख्यं इति वक्तुं न शक्यते दृष्टान्ते पु
लकाद्यैर्यत्तद्ब्रह्मध्यानमुच्यते ९८ यत्सुखं विद्यते
ध्याने देहावशाकरं परं कथितं नैव शक्नोति प्रबुद्ध
स्तु समाहिताः ९९ ब्रह्मध्यानरतानंदपराः सुकृति
नो नराः तत्पुण्यं नहि ते तस्मिन्पशो चेन्यसिहता इव
१ समसोल्लाससंयुक्तानां भक्ताहिनां महात्मनां अष्टौ
त्रिकालज्ञानोत्थप्रभयाश्च कुलेश्वरि २ अष्टावस्था
श्च कथ्या जायंते नात्र संशयः बहुनात्र किमुक्तेन
अणिमाद्यष्टसिद्धयः प्रतीहारपदं प्राप्ताः सेवंते मं
दिरं चिरं ये गणाः परमेशस्य पंचतत्त्वयुतरोः शु
भाः ते गुणाः कुलतत्त्वज्ञे तत्त्वज्ञानसमाहिताः आरं
भस्तरुणश्चापि यौवनः प्रौढ उच्यते ५ तदंतो जा
यदिसुक्ताश्चोत्मना स्वम उच्यते अनावस्था सुषुप्ति
स्थावस्थात्रितयसंयुता सम्मोदत्तामाश्च योवेत्ति स
शिवः सव कौलिकः ७ प्रवृत्ते भैरवे चक्रे सर्वे वर्णा
द्विजातयः निवृत्ते भैरवे चक्रे सर्वे वर्णाः पृथक्पृ

थक् ८ स्त्रीवाचपुरुषःषंढःचंडालोवाद्विजोत्तमः
चक्रमध्येनभेदोस्तिसर्वेदेवसमाःस्मृताः ९ नग
रीनिर्गमाद्यंतुगंगांप्राप्ययथैकतां यांतिश्रीचक्र
मध्येतुचैकत्वंमानवास्तथा १० क्षीरेणसहितंतोयं
क्षीरमेवयथाभवेत् तथाश्रीचक्रमध्येपिजाति
भेदोनविद्यते ११ स्वर्गादिष्वपिलोकेषुदेवादन्यो
यथानहि तथैवचक्रमध्येपिमानवाःसर्वदेवताः
१२ जातिभेदोनचक्रेस्तिसर्वेशिवसमास्मृताःवे दे
पिसर्वमेवेहिसर्वंब्रह्मेतिवाब्रवीत् १३ वहुनात्र
किमुक्तेनचक्रमध्येकुलेश्वरि मद्रूपाःपुरुषाःस
र्वेत्वद्रूपाःप्रमदाःप्रिये चक्रमध्येचमूढात्माजा
तिभेदंकरोतियः तेभक्ष्यंतियोगिन्यःशासये
त्कुलनायिके १४ स्त्रीणामन्यतमंस्थानेपुंसाम
न्यतमंपृथक् अथवामिथुनेकृत्वाक्रमात्तमुप
वेशयेत् १५ पंक्त्याकारेणवासम्यक्चक्राकारेण
वाप्रिये शिवशक्तिधियासर्वांश्चक्रमध्येसमर्च
येत् १६ अविभक्तोयथावावांलक्ष्मीनारायणोप्रि
ये यथावाणीशानानेदातथावीरःसशक्तिकः १७

मयकुंभसहस्रैश्च मांसभारशतैरपि नतुष्यामिव
रारोहे भगलिंगामृतं विना १९ नवकौंकनपश्यां के
नवश्रौकमिदं जगत् लिंगांकं च भगांकं च तस्माच्छिव
शिवात्मकं २० शिवशक्त्योस्ति संयोगो यस्मिन्काले प्र
जायते सा संध्या कुलनिष्ठानां समाधिः स विधीयते
कामुको न स्त्रियं गच्छेदतिष्ठेत्तामदीक्षितां मयःसं
स्कारसंशुद्धां विहितत्वाद्भजेत्स्त्रियं २२ इति तत्त्व
त्रयोल्लासपानभेदा विचोदिते समासेन कुलेशा
नि किं भूयः श्रोतुमिच्छसि २३ इति श्रीकुलार्णवे म
हारहस्ये तत्त्वत्रयादिकथनं नामाष्टमोल्लासः ८
श्रीदेव्युवाच कुलेश श्रोतुमिच्छामि योगं योगीशल
क्षणं कुलभक्त्यार्चनफलं वद मे करुणानिधे १ श्री
ईश्वर उवाच शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृ
च्छसि तस्य श्रवणमात्रेण योगः साक्षात्प्रकाशते
२ ध्यानं तु द्विविधं प्रोक्तं स्थूलध्यानं प्रकुर्वीत स्थूल
चेन्निश्चलं चेतो भवेत्सूक्ष्मेपि तत्स्थितं ३ करपादो
दरांगादिरहितं परमेश्वरं सर्वतेजोमयं ध्यायेत्स
च्चिदानंदलक्षणं ४ नोदेति नास्तमभ्येति न वृद्धिं

यातितन्नित्यं स्वयंविभात्यथान्यानिभासयेत्स्माय
नेविना ६ अनन्तमितिमारूपेसज्ञामात्रमगोच
रं सर्वतेजोमयंध्यायेत्स्वचिदानंदलक्षणं ७ वच
सामात्मसंवेद्यंतज्ज्ञानंब्रह्मसंज्ञकं प्रनष्टवायुसं
चारपाषाणस्वनिश्चलः ८ परजीवैकसंज्ञेयोयो
गीयोगविदुच्यते यदर्थमात्रनिर्भासंस्तिमितोद
धिवास्थितं ९ स्वरूपशून्यंध्यानंयत्तत्समाधिर्वि
धीयते नकिंचिच्चिंतनादेवस्वयंतत्त्वप्रकाशनं
स्वयंप्रकाशितेतत्त्वेतत्क्षणात्तन्मयोभवेत् स्वप्र
जाग्रदवस्थायांसुप्तवद्योवतिष्ठते ११ निःश्वासो
च्छ्वासहीनस्तुनिश्चितेमुक्तएवसः निस्पंदकर
णग्रामःस्वात्मलीनमनोनिलः १२ यत्रास्तेमृत
वत्तावज्जीवन्मुक्तःसउच्यते नशृणोतिनचाघ्रा
तिनत्वस्पृशतिनपश्यति १३ नजानातिसुखंदुःखं
नसंकल्पयतेमनः नचाभिमन्यतेकिंचिन्नचबु
ध्यतिकाष्ठवत् १४ एवंशिवेविलीनात्मासमाधि
स्थइहोच्यते यथाजलेजलंक्षिप्तंक्षीरेक्षीरंघृतेघृ
तं १५ अविशेषोभवेत्तद्वज्जीवात्मापरमात्मनि

यथाध्यानस्यसामर्थ्यात्कीटोपिभ्रमरायते १९ त
थासमाधिसामर्थ्याद्ब्रह्मभूतोभवेन्नरः क्षीणेद्वै
तेहृतेयद्वन्नत्रलिमेनपूर्ववत् एषकृकृतोगुणा
भ्यासावात्मानहृदिहापिच यथागाढान्धकार
स्थोनकिंचिदिहपश्यति १८ अमनस्कस्तथायो
गीप्रपंचंनैवपश्यति यथानिमीलनेकालेप्र
पंचोनैवदृश्यते तथैवोन्मीलनेस्याच्चेदेतद्ध्या
नस्यलक्षणं २॰ जनःस्वदेहकंहंतीविजानाति
यथातथा परब्रह्मस्वरूपीचवेत्तिविश्वविवेष्टि
तं २१ विदितेतुपरेतत्त्वेवर्णातीतेह्यविक्रियेकिं
कारत्वंहिगच्छंतिमंत्रामंत्राधिपैःसह २२ आत्मै
कभावनिष्ठस्ययायावेष्टानदर्चनं वोयोजल्पः
सस्तमंत्रःतद्ध्यानेयद्विरीक्षणं २३ देहाभिमाने
गलितेविज्ञानेपरमात्मनि यत्रयत्रमनोयाति
तत्रतत्रसमाधयः २४ भिद्यतेहृदयग्रंथिश्छिद्यं
तेसर्वसंशयः क्षीयंतेचास्यकर्माणितस्मिन्दृ
ष्टेपरावरे २५ योगीक्षणायदाप्राप्तेनिर्मलेपरमे
पदे देवासुरपदेयद्वत्प्राप्तेचापिनस्पृहते २६

यः पश्येत्सर्वगं शान्तमानन्दात्मानमद्वयं नकिं
चित्तस्यप्राप्तमव्यक्तान्तव्यं चावशिष्यते २७ संप्राप्ते
ज्ञानविज्ञाने ज्ञेये च हृदि संस्थिते लब्धशान्तपदे
देवि नयोगो नैव धारणा २८ यो ब्रह्माणि विज्ञा
ते समस्तैर्नियमैरलं तालवृन्तेन किं कार्यं लब्धे
मलयमारुते श्वासस्य काबंधनेनास्ति नासिकाबं
धनेन हि न यमो नियमो नास्ति स्वयमोमितिप
श्यतो २९ न पद्मासनतो योगो न नासाग्रनिरीक्ष
णं ऐक्यं जीवात्मनोराहुर्योगं योगविशारदाः ३१
ध्यायतः क्षणमात्रं वा श्रद्धया परमं महः यद्भवे
त्तु महत्पुण्यं तस्यान्तो नैव गण्यते ३२ क्षणं ब्रह्मा
हमस्मीति यः कुर्यादात्मचिंतनं स सर्वपातकं
हन्यात्तमः सूर्योदये यथा ३३ व्रतक्रतुतपस्तीर्थ
दानदेवार्चनादिषु यत् फलं कोटिगुणितं तद्देवा
मोति तत्त्ववित् उत्तमा सहजावस्था मध्यमा ध्या
नधारणा जपः स्तुतिः स्यादधमा होमपूजाधमा
धमा ३४ उत्तमा तत्त्वचिंता स्याज्जपचिंता तु मध्य
मा शास्त्रचिंताधमा ज्ञेया लोकचिंताधमाधमा ३५

श्री० ५४

54

पूजाकोटिसमंस्तोत्रंस्तोत्रकोटिसमोजपः जप
कोटिसमंध्यानंध्यानकोटिसमोलयः ३७ नहिना
दात्परोमंत्रोनदेवःस्वात्मनःपरः नात्मसंधोपरापू
जानहिःत्प्तःपरंफलं ३८ अक्रियैवपरापूजामा
नमेवपरोजपः अचिंतैवपरंध्यानमनिच्छैवपरं
फलं ३९ मंत्रोदकैर्विनासंध्याजपहोमैर्विनातपः
उपचारैर्विनापूजायोगीनित्यंसमाचरेत् देहोदेवा
लयोदेवजीवोदेवःसदाशिवः त्यजेदज्ञाननिर्मा
ल्यंसोहंभावेनपूजयेत् ४१ जीवःशिवःशिवो
जीवःसजीवःकेवलःशिवः पाशबद्धःसदाजीवः
पाशमुक्तस्सदाशिवः तुषेणबद्धोव्रीहिःस्यात्तुषा
भावेनतंडुलः कर्मबंधःसदाजीवःकर्ममुक्तः
शिवःप्रिये ४२ अग्नौतिष्ठतिविप्राणांहृदिदेवो
मनीषिणां प्रतिमास्वल्पबुद्धीनांसर्वत्रविदिता
त्मनां ४४ योनिंदास्तुतिशीतोष्णसुखदुःखादि
बंधुषुसमश्चित्तयोगीशोहर्षामर्षविवर्जितः
४५ निःस्पृहोनित्यसंतुष्टःसमदर्शीजितेंद्रियः
आस्तेदेहेप्रवासीवसयोगीपरतत्त्ववित् ४६ निः

संकल्पविकल्पश्च निलीनो यापि वा मनः नि
जस्वरूपनिर्मग्नः स योगी परतत्त्ववित् यथा
पंग्वंधवधिरक्लीवमूकजडादयः निवसंति
पराधीनास्तथा योगी च तत्त्ववित् ४८ पंच
मुद्रासमुत्पन्नपरमानंदनिर्भरः यश्चास्ते स
तु योगींद्रः पश्यन्नात्मानमात्मनि ४९ अलि
मांसांगनासंगैर्यत्सुखं जायते प्रिये तदेव
मोक्षो विदुषामबुधानां तु पातकं सदामां
सासवोल्लासः सदा स्मरणचिंतकः सदासं
शयहीनो यः कुलयोगी स उच्यते ५१ पिवे
न्मद्यं पलं खादन् स्वेच्छाचारपरायणः अहं
ते दं तयोरैक्यं भावयन्निवसत्सुखं ५२ आमि
षासवसौरभ्यहीनं यस्य मुखं भवेत् प्राय
श्चित्ती स वर्ज्यश्च देवेवंडालवत्सदा ५३ याव
दासवगंधः स्यात्पशुः पशुपतिः स्वयं विनाकि
मांसगंधेन साक्षात्पशुपतिः पशुः ५४ लोके
निकृष्टमुत्कृष्टं लोकोत्कृष्टं निकृष्टकं कुलमा
र्गे समुद्दिष्टं भैरवेन महात्मनाः ५५ अनाचा

श्री॰
५५

55

रः सदाचारः त्वकार्यं कार्यमुत्तमं असत्यमपि स
त्यं स्यात्कौलिकानां कुलेश्वरि ५६ अपेयमपि पे
यं स्यादभक्ष्यं भक्ष्यमेव च अगम्यमपि गम्यं च कौ
लिकानां कुलेश्वरि ५७ न विधिर्न निषेधः स्या
न्न पुण्यं न च पातकं न स्वर्गो नैव नरकः कौलि
कानां कुलेश्वरि ५८ शात्रवश्चापि मित्रं ते मा
त्रादासंति भूमिपाः बांधवंति जनाः सर्वे कौ
लिकानां कुलेश्वरि ५९ दुःखिताः सुखिताः सर्वे
गर्विताः प्रणमंति च बाधकाः साधकायंते कौ
लिकानां कुलेश्वरि ६० दुर्गुणाः सद्गुणायंते अ
कुलेश कुलायते अधमोप्यापि धर्मंति कौलि
कानां कुलेश्वरि ६१ मर्त्या दैवायते देवि सर्गाः
साक्षाद्गृहायते पुण्यायंते च संसृष्टयः कौलि
कानां कुलेश्वरि ६२ अनभिज्ञा अभिज्ञंति दरि
द्रा धनदंति च विनष्टा अभिवर्धंते कौलिकाः
कुलनायिके ६३ बहुनात्र किमुक्तेन कुलयो
गीश्वरः प्रिये सदा सत्कर्म संसिद्धानात्र कार्या
विचारणा ६४ येन केनापि वेषेण येन केनाप्य

लक्षितः यत्रकुत्राश्रमे तिष्ठन्कुलयोगी प्र
वर्तते ६४ योगिनो विविधैर्वर्णैर्नराणामुप
कारिणः भ्रमंति पृथिवीमेतामविज्ञातस्वरू
पिणः ६६ सकृन्नैवात्मविज्ञानं स्थापयेत्कुल
योगवित् उन्मत्तमूकजडवन्निवसेल्लोकम
ध्यके ६७ अलक्ष्याहि यथालोके व्योम्निचंद्रार्क
योर्गतिः नक्षत्राणांग्रहाणांच तथा वृत्तं तु यो
गिनः ६८ आकाशे पक्षिणां देवि जलेपि जलचा
रिणां यथा गतिर्न दृश्येत तथा वृत्तं महात्मनो
६९ असंतस्त्ववभाषंते वाचिरेत्यज्ञास्त्वप्रिये पाम
राश्वदृश्यंते कुलयोगविशारदाः ७० नाना
यथाविमत्ये रत्नाढ्येषु नैव गाति ७१ न किंचिद
पि भाषेरन् तथा योगी प्रवर्तते ७२ मुक्तो बाल
कवत्क्रीडेत्कुलयोगी कुलेश्वरि यथा हसंति
लोकोयं जुगुप्सति च कुत्सति विलोक्य दूरतो
याति तथा योगी प्रवर्तते ७३ क्वचिच्छिष्टः क्वचि
द्भ्रष्टः क्वचिद्भूतपिशाचवत् नानावेशधरो यो
गी विचरंति महीतले ७४ योगी लोकोपकारा

श्री॰
५८
56

यभोगान्भुक्तेनकोऽप्यया ग्रनुग्रहणान्जनात्मवी
क्रीडते जगतीतले ७५ सर्वपापी यथा सूर्यः स
र्वभक्षी यथानलः योगी भुक्त्वाखिलान्भोगांस्तथा
पापैर्नलिप्यते ७६ सर्वस्पर्शी यथा वायुर्यथाका
शश्च सर्वगः सर्वे यथा नदीस्नाता तथा योगी स
दाशुचिः ७७ यथा ग्रामगतं तोयं नदीयुक्तं सदाशु
चिः तथा म्लेच्छगृहान्नादियोगिहस्तार्पणे शुचिः ७८
यथा चरन्ति देवेशि कुलज्ञानपरायणाः तदेव विदु
षा मान्यमात्मनो हितमिच्छता ७९ यस्मिंश्चरति यो
गीशः समार्गः परमो मतः यस्मादुदेतिः सूर्यः सा
पूर्वाशा न तु दृश्यते ८० यत्र मत्तगजो याति तत्र
मार्गो यथा भवेत् कुलयोगी चरेद्यत्र स सन्मार्गः
कुलेश्वरि ८१ नदीवक्राम्रजीकर्तुं निरोद्धुं तत्प्रवा
हकं स्वेच्छाविहारिणां मन्ये को वा वारयितुं क्षमः
८२ यद्वत्संत्रबलोपेतः क्रीडन्सर्वैर्न दृश्यते तद्व
न्न दृश्यते ज्ञानी क्रीडन्निन्द्रियपन्नगैः ८३ निहृ
तडःस्वात्मतत्त्वस्थः निर्द्वन्द्वा गतमत्स राः कुलज्ञा
नरताः शान्तास्त्यक्त्वा स्तेच कौलिकाः ८४ अम

दक्षो यदं भाषणाहंकाराः सत्यवादिनः कौलिकेंद्रा
ज्ञानपरायेनेंद्रियवशानुगाः ८५ कीर्त्यमानेकु
लेयेषांरोमांचोगद्गदस्वरः आनंदोचूर्णितोदेवि
कथिताःकुलकेश्वराः सर्वधर्मापिकोलोकेकुलध
र्माशिवोदितः इतियेनिश्चितधियःप्रोक्तास्तेकौ
लिकोत्तमः ८७ योभवेत्कुलतत्वज्ञःकुलमार्ग
विशारदः कुलार्चनपरःसम्यक्कौलिकोदांभिको
परः ८८ कुलभक्त्याकुलज्ञानात्कुलवाशनकुल
व्रतान् प्रीतोभवतिपार्वहिकौलिकःसतमेप्रि
यः ८९ तत्वत्रयश्रीचरणामूलमंत्रार्थतत्ववित्
देवतागुरुभक्तश्चकौलिकःसतमेप्रियः ९० कु
लेभसर्वलोकेषुकुलाचारस्यदर्शने विपाकेने
वपुण्यानांलभ्यतेनान्यथाप्रिये ९१ संस्मृतःकी
र्तितोदृष्टोवंदितोभाषितोपिवा पुनातिकुलध
र्मिष्ठश्चंडालोपियदृच्छया ९२ सर्वज्ञोवापिमूर्खो
वाधुत्तमोवाधमोपिवा देवियत्रकुलज्ञानेतत्रा
हंचत्वयासह ९३ नाहंवासामिकैलासेनमेरौन
चमंदिरे कुलज्ञायत्रतिष्ठंतितत्रतिष्ठामियाम

श्री॰ ५७
57

संपर्कात्परानंदोभिजायते गुरुं तमेव वृणुयान्ना
परं मतिमान्प्रिये १३ यस्यात्रभवपर्यंतवृद्धिस्त
त्त्वे प्रवर्तते तस्यालोकनमात्रेण मुच्यते नात्र सं
शयः १४ शंकयाभक्तितं सर्वं त्रैलोक्यं सचरा
चरं साशंकाभक्तिनायेन स गुरुर्देवि दुर्लभः
१५ यथावह्निसमीपस्थं नवनीतं विलीयते त
थापापं विलीयेत सदाचार्यसमीपतः १६ यथा
दीपानला काष्ठं शुष्कमार्द्रं च निर्दहेत् तथा गुरु
कटाक्षस्तु शिष्यपापं दहेत्क्षणात् १७ यथा मह्रा
निलोद्धतं तूलं दशदिशो व्रजेत् तथैव गुरुका
रुण्यात्पापराशिः प्रलीयते १८ दीपदर्शनमा

त्रेणप्रणश्यतिमहात्तमः मङ्गोर्दर्शनाद्देवि
तथात्तानंविनश्यति १९ सर्वलक्षणसंपन्नो
वेदशास्त्रविशारदः सर्वोपायविधानज्ञः स्त
त्त्वहीनोगुरुर्नहि २० पूजाहोमाश्रमाचारस्तप
स्तीर्थव्रतादिकं मंत्रागमादिविज्ञानंतत्वहीन
स्यनिष्फलं २१ स्वसंवेद्येपरंतत्वेस्वात्मन्यस्तिन
निश्चयः स्वात्मनोनुग्रहोनास्तिपरस्यानुग्रहः
कुतः २२ घटाकारमनोरूपंप्रत्यक्षंस्वात्मनिस्थि
तिं योनजानातिचात्यस्यकथंमोक्षोददात्यसौ २३
सलक्षणहीनोपितत्वज्ञानीगुरुःस्मृतः तस्मात्त
त्वविदेदेहीमुक्तोमोचकएवहि २४ यस्तत्ववि
न्महेशानिसपशुर्वोधर्येयत्य पितत्वहीनेकुतो
र्हात्मपरिग्रहः २५ नतत्वज्ञैरुपादिष्टायेनतत्वज्ञा
स्तेनसंशयः पशुभिश्चोपदिष्टायेदेवितेपश
वःस्मृताः २६ विद्धस्तत्वोपयेद्देविनावुद्धोवोध
कोभवेत् मुक्तस्तुमोचयेद्वद्धंनमुक्तोमोचकः
कथं २७ मतिमांश्चोद्धरेन्मूर्खंनमूर्खोमूर्खमुद्ध
रेत् शिलांसंतारयेन्नोहिकिंशैलस्तारयेच्छिलां

श्री॰
कु॰
८४
84

२८ तत्त्वहीनं गुरुं लब्ध्वा केवलं भवत्परं इहामुत्र
फलं किंचित्स नरो नाप्नुयात्प्रिये २९ शैवे गुरुत्र
यं प्रोक्तं वैष्णवे गुरुपंचकं वेदशास्त्रेष्वनन्तशो
रुरेकः कुलान्वये ३० प्रेरकः सूचकश्चैव वाचको
दर्शकस्तथा शिक्षको बोधकश्चेति षडेते गुरु
वः स्मृताः ३१ पंचैते कार्यभूतास्तु कारणं बोध
को भवेत् सर्वाभिषेककर्ता यो गुरुस्तत्रैव पा
ठका ३२ सृजनीयात्कुलेशानि वह्नित्वेऽपि न संश
यः श्रीगुरुलक्षणो येन संशयच्छेदकारकं ३३
लब्धा ज्ञानप्रदं देवि न गुर्वन्तरमाश्रयेत् सर्वभि
ज्ञो गुरुं प्राप्य संशयाच्छेदकारकं ३४ शिष्यो गुर्व
न्तरं गत्वा न दोषेणावलिप्यते मधुलुब्धो यथा
भृंगः पुष्पात्पुष्पान्तरं व्रजेत् ३५ ज्ञानलुब्धस्तथा
शिष्यो गुरोर्गुर्वन्तरं व्रजेत् इति ते कथितं किंचि
ल्लक्षणं गुरुशिष्ययो ३६ समासेन कुलेशानि
किं भूयः श्रोतुमिच्छसि इति श्रीकुलार्णवे म
हारहस्ये गुरुशिष्यलक्षणकथनं नाम त्रयोद
शोल्लासः १३ श्रीदेव्युवाच कुलेश श्रोतुमिच्छा

मिपरीत्तं गुरुशिष्ययोः उपदेशक्रमं दीक्षां भे
दं च वद मे प्रभो श्रीईश्वर उवाच शृणु देवि प्रव
क्ष्यामि यन्मां त्वं परिपृच्छसि तस्य श्रवणमात्रेण
चित्तशुद्धिः प्रजायते २ विना दीक्षां न मोक्षः स्यात्प्रा
णिनां शिवशासने सा च न स्याद्विना चार्यमित्या
चार्यपरंपरा ३ तेषां सिद्धान्तशास्त्रार्थं संप्रदा
यदि हेतवः आज्ञावेणोपदिष्टाश्च मंत्राः स्युर्निष्फ
लाः यतः ४ देवास्तमेव शंसंति पारंपर्य प्रवर्तक
म् गुरुं मंत्रागमाभिज्ञं समयाचारपालकं ५ गु
रुः शिष्याधिकारार्थं विरक्तोपि शिवाज्ञया किंचि
त्कालं विधायैनं स्वशिष्याय समर्पयेत् ६ तस्मा
र्पिताधिकारस्य योगः साक्षात्परे शिवे तदंते शा
श्वते मुक्तिरिति शंकरभाषिते ७ तस्मात्सर्वप्रयत्ने
न साक्षात्परशिवोदिते संप्रदायमविच्छिन्नं सदा
कुर्याद्गुरुः प्रिये ८ भुक्तिमुक्तिस्वसिद्ध्यर्थं परीक्ष्य
विधिवद्गुरुः पश्चादुपदिशेन्मंत्रमन्यथा निष्फ
लं भवेत् ९ अन्यायेन तयोर्दद्याद्गुरुणा त्वन्यायत
श्च यः ददतो गृह्णतो देवि कुलशापो भविष्यति

श्री॰
कु॰
८५
85

१० गुरुशिष्यावुभौमोहादपरीक्ष्यपरस्परं उपदेशं
ददद्गृह्णन्स्यातुतौतौपिशाचताम् ११ अशास्त्री
योपदेशंतुयोगृह्णातिददातिच भुंजतेतावुभौ
घोरान्नरकानेकविंशति १२ असंस्कृतोपदेशंतु
यःकरोतिहिमूढधीः विनश्यतीवतन्मंत्रंसेक
तेशालिबीजवत् १३ अनर्हेमंत्रविज्ञानंनति
ष्ठतिकदाचन तस्मात्परीक्ष्यभक्तंचमन्यथानि
ष्फलंभवेत् १४ स्नात्वासमयदीक्षांचदत्त्वासम
यपाडकौ १५ तत्तज्ज्ञानेहितच्छास्त्रेतत्तद्देमखे
डितं सच्छिष्यायातिभक्तायचज्ञानमुपदिश्यते
१६ असच्छिष्येषुभक्तेषुयज्ज्ञानमुपदिशते तत्स
यात्यपवित्रत्वंगोक्षीरंश्वदृताविव १७ यनेच्छाभ
यलोभाद्यैरयोग्यंयदिदीक्षयेत् देवताशापमा
मोतिकृतंचविफलंभवेत् १८ ज्ञानेनक्रिययावा
पिगुरुःशिष्यपरीक्षयेत् संवत्सरंतदर्धंवातद
र्धंवाप्रयत्नतः १९ तत्रमांस्थापयेकुर्यान्नीचोत्त
मकर्माणि प्राणद्रव्यप्रदानाद्यैरादेशैश्चसमास
मैः २० तन्ममसूचकैर्वाक्यैर्मायाभिःकूरचेष्टितैः

पक्षपातैरुदासीनैरनकस्मशुद्धैर्महः २१ आ
कृष्टताडिताचापिये विवादं न यांति हि गुरुः
कृपां करोति मुदा मे चिंतयेत्सदा २२ श्रीगुरुः
स्मरणे चापि कीर्तिनी दर्शने पि च वेदने परिच
र्यायामाज्ञाने प्रेषणे प्रिये २३ आनंदकं परो मो
चस्वरने आदि विक्रया येषां स्यात्ते योग्याः सुदी
क्षासंस्कारकर्मस्व २४ शिष्योपि लक्षणैरेतैः कु
र्यात्कृपरेक्षणाम् आनंदाय जयै स्तोत्रैयानहो
मार्चनादिषु २५ ज्ञानोपदेशसामर्थ्यं मंत्रसिद्धि
मपीश्वरि बोधकत्वं च विज्ञाय शिष्यो भूयात्त्वचा
न्यथा २६ आदिमध्यावसानेषु योग्याशक्तिविपा
तिताः प्रथमा मध्यमाः श्रेष्ठा शिष्यादेवि प्रकीर्ति
नः २७ आदौ भक्तिर्भवेद्देवि दीक्षार्थं संवदंति ये
पुनर्विलम्बभक्तास्ते आदियोग्या इतीरिताः २८
दीक्षासमये संप्राप्ता ज्ञानविज्ञानरंजिताः भक्त्या
प्रवृद्धवीर्या ये मध्ययोग्यास्त्वते स्मृताः २९ आदौ
भक्तिविहीना ये मध्ये भक्तिस्तथा तथा अंते प्रभू
तभक्तिस्ते अंतयोग्या भवंति हि ३० उत्तमो ज्ञानसं

श्री कु ८६
86

तश्चस्पर्शोपदेशस्तथाप्रिये यथापिप्पलिकासं
दंशंदेहयगफले ३१ विरेणाप्नोतिकांस्तोपिदे
शश्चापितथाविधः यथाकपिश्च शाखायाः शा
खामुत्प्लंवयत्ततः ३२ फलंप्राप्नोतिभक्त्यास्यादु
पदेशस्तथाप्रिये यथाविहंगमःशीघ्रंफलमे
वप्रसीदति ३३ तथाज्ञानोपदेशस्तुकथितःकु
लनायिके स्पर्शाख्यादेविदृक्संज्ञामानसाख्याम
हेश्वरि ३४ क्रियायामादिरहितादेविदीक्षात्रि
यात्मिका यथापक्षीस्वपक्षाभ्यांशिशून्संवर्धय
च्छनै ३५ स्पर्शदीक्षोपदेशस्तुतादृशःकथितः
प्रिये स्वापत्यानियथामत्स्यावीक्षणेनैवपोष
येत् ३६ दृग्दीक्षाख्योपदेशस्तुतादृशःकथितःप्रि
ये यथाकूर्मःस्वतनयान्ध्यानमात्रेणपोषयेत्
वेधदीक्षोपदेशश्चमानसःस्यात्तथाप्रिये शक्ति
पातानुसारेणशिष्योनुग्रहमर्हति ३७ यत्रश
क्तिर्नपतितातत्रसिद्धिर्नजायते क्रियावर्णकला।
स्पर्शवाग्दृग्ध्यानसंज्ञकाः ३८ दीक्षामोक्षप्र
दादेविसप्तधापरिकीर्तिता समयाख्याविशेषाख्या

साधकापुत्रकाख्यया ४० बोधकाहणीसंज्ञास्या
दन्यानिर्वाणसंज्ञका क्रियादीक्षाष्टधाप्रोक्ता
कुंडपद्मपूर्विका ४१ कलशादिसमायुक्ताकर्त्तव्या
गुरुणावहिः देवेशिदेहस्थद्वार्थपूर्वोक्तविधि
नाचरेत् ४२ वर्णदीक्षात्रिधाप्रोक्ताअष्टचत्वा
रिंशदक्षरैः एकपंचाशद्वर्णैर्वात्रिषष्टिलिपि
भिस्तथा ४३ वर्णान्शिष्यतनौन्यस्यप्रतिलोमे
नसंहरेत् परमात्मनिसंयोज्यतच्चैतन्यंद्विपेन्द्र
रुः ४४ तस्मादुत्पादितान्वर्णान्सेछिष्यतनौ
पुनः सृष्टिक्रमेणाविधिनाचैतन्यंचनियोजये
त् ४५ जायतेदेवताभावः परानंदमयाशिवः
एषावर्णमयीदीक्षाप्रोक्तायाशापहाप्रिये ४६
कलादीक्षात्रिधाप्रोक्ताकर्त्तव्याविधिवत्प्रिये
निवृत्तिर्जानुपर्यंतंतलादारभ्यसंस्थितः ४७
जानुतोनाभिपर्यंतंप्रतिष्ठातिष्ठतिप्रिये ना
भेः कंठावधिव्यामाविद्याः शांतिस्तथाप्रिये ४८
कंठाल्ललाटपर्यंतेव्याप्तस्तस्माच्छिरोवधिः शां
त्यतीताकलाज्ञेयाकलाव्याप्तिरितीरिताः ४९

संहारक्रमयोगेन स्थानात्स्थानान्तरं प्रिये सयो
ज्य वेधयेत्तस्य ग्विधिवज्ञाः शिवावधि ५० इयं प्रो
क्ता कुलेशानि दिव्यभावप्रदायिनी अष्टात्रिंशत्क
लाभिर्वा पंचाशद्भिरथापि वा ५१ तत्वन्यासक्रमे
णैव सृष्टिसंहारमार्गतः ज्ञात्वा गुरुमुखाद्देवि
शिष्यं संयोज्य वेधयेत् ५२ जायते देवताभावो
योगिनीवीरसंगमः कलादीक्षा समादिष्टा प
शुपाशापहारिणी ५३ हस्ते गुरोः शिवं ध्यात्वा ज
पन्मूलं गमालिनी गुरुः स्पृशेच्छिष्यतन्वे स्पर्शदी
क्षा भवेदियं ५४ चित्तं तत्वे समादाय परतत्वोप
बृंहितान् इच्छारेत्तेहितान्मे ज्ञात्वा गदीक्षेति निगद्य
ते ५५ निमील्य नयने ध्यात्वा परतत्वं प्रसन्नधीः
सम्यक्कृपयेद्गुरुः शिष्यं दृग्दीक्षा सा भवेत्प्रिये ५६
गुरोरालोकमात्रेण भाषणात्स्पर्शनादपि सद्यः सं
जायते ज्ञानं सा दीक्षा शांभवी स्मृता ५७ मनोदीक्षा
द्विधा प्रोक्ता तीव्रा तीव्रतरेति च ध्यानेषद्धियं ज्ञा
त्वा शिष्यदेहे स्मरेत्प्रिये ५८ कल्पयेद्भुवनं तत्वं क
लां वर्णं पदे मन्त्रे सृजाद्युनाभिहृत्कंठतालुमूर्ध्नि

नमेविके ५५ गुरूपदिष्टमार्गेणवेधंकुर्यात्तिवत्त
णः पाशमुक्तात्तणात्शिष्यःपरानंदमयोभवेत् ८०
एषामुक्तिप्रदाप्रोक्तातीव्रदीक्षाकुलेश्वरि देवित्ती
व्रतरावापिगुरुणास्मृतिमात्रतः ८१ सम्यक्तवेधि
तःशिष्यःछिन्नपाशस्तदाभवेत् वाक्यव्यापारनिर्मु
क्तोभूमौपततितत्क्षणात् ८२ संजातदिव्यभावो
सौसर्वंविदंतिशांभवि यदस्तिवेदकालेतत्स्वय
मेवानुरूपिते ८३ प्रवृद्धस्तनशक्नोतितत्साध्वेव
क्तमीश्वरि वेधविद्धःशिवःसाक्षान्नपुनर्जन्मतो
व्रजेत् ८४ एषातीव्रतवादीक्षाभववेधविमोचि
नी शिवभावप्रदासाक्षाद्दीक्षासाकुलनायिके ८५
आनंदश्चैववकंपश्चनिद्राबाघूर्णोकुलेश्वरि निद्रामू
र्छाचतद्रूपाःषडवस्थाःप्रकीर्तिताः ८६ इत्थंपतेष
डुणास्युनिवेधकालेकुलेश्वरि वेधितोयत्रकुत्रा
पितिष्ठन्मुक्तोनसंशयः ८७ वेधदीक्षाकरोलोके
श्रीगुरुर्दुर्लभःप्रिये शिष्योपिदुर्लभस्तादृक्पुण्य
योगेनलभ्यते ८८ नदद्यात्यस्यकस्यापिरत्यागात्पा
रमेश्वरि कुलद्रव्यंसमभ्यर्च्यकुलचक्रेविधानतः

श्री० कु० ८८

88

१९ शिष्याय दर्शयेद्देवि दीक्षैषा कौलिकी स्मृता: सि
द्धद्रव्यैस्सुधीपूर्यपवखेमामृतान्विते २० अभिषिं
चेत्त्रियं शिष्यमन्तुषावेयमीरिता सजेवमीनपु
क्रेन स्सरया पूरितेचत २१ पंचामृतैः समं पूर्णाशोव
नकलशेनवा अभिषेकेन ततः कुर्याद्धाल्येन कथितः
पुनः २२ मीडंतलंपिकादेवि वक्ष्ये कलशावच्यते
पचखोमामृतापूर्णाशिष्यांतेनाभिषिंचयेत् २३
अयं सिद्धाभिषेकास्यादाचार्यात्वस्यपार्वति सीका
रोदंतकाष्ठं च पुष्पांजलिरपि प्रिये २४ शांखोवेदश्वा
भिषेकं तथा ज्ञात्वाद्धिया भवेत् समये दंतकाष्ठेन
साधकः कुसुमांजलिः २५ पुत्रः शांखाभिषेकेन को
वोपसंज्ञया पूर्णाभिषेकेनाचार्यः पंचावस्थाप्रकी
र्त्तितः २६ कुलाचारैकनिरतः गुरुभक्त्या दृढव्रताः
पूर्णाभिषेकहीना ये स्मृतास्तु कुलनायिके पुनर्ली
डोद्भवं जन्म गुरुणा शिवरूपिणा २८ प्राज्ञाः पूर्णा
भिषेकेन शिवसायुज्यदायिना तेच मुक्तिं व्रजंतीव
शांभवी वाक्यमब्रवीत् २९ पूर्णाभिषेकहीनो यः
कौलिकोपि स्मृतो यदि पिशाचत्वमवाप्नोति यावदा

भूतमन्त्रवत् दीक्षा च त्रिविधा प्रोक्ता वाह्याभ्यंत
रभेदतः क्रियादीक्षा भवेद्बाह्या वेधाख्याऽभ्यंतरे
भवेत् ८१ अंतःशुद्धिर्बहिःशुद्धिः द्विविधा परिकी
र्तितः अंतस्तत्त्वत्रयाच्छुद्धिर्बहिःशुद्धिस्तु दीक्ष
या ८२ दीक्षामोक्षोपदेशेन चंडालोपि विमुच्यते
आभ्यां विना कुलेशानि कौलिके नैव मुच्यते ८३
शरीरस्य न संस्कारो जायते न च कर्मणा आत्मनः
कारयेद्दीक्षामनादिमनस्हितः ८४ दीक्षाख्ये
तःकर्मसंस्कारोभिन्नार्थप्रतिपादकः अभिसंधान
कृपया त्वा देशिकोत्तमशिष्ययोः ८५ मंत्राधयेयै
र्याहत्याद्विद्विधशक्तिं कुलेश्वरि पशुपाशं तथा
छिंद्यां दीक्षायामेत्रविलक्षणात् ८६ अस्मात्त्रवि
तताहं येपापरमेस्यानवोयवान् दीक्षयामोक्ष
येत्सर्वं दिक्षेपामनयन्यापि ८७ उपपातकल
क्षाणि महापातककोटया क्षणाद्दहति देवे
शि दीक्षाहिविधिनाकृता ८८ यद्यैवोन्मीलिता
त्मानो भवंति पशवः सा दीक्षाद्धि`` तादेविप
शुपाशविमोचिनी ८९ यथा दीक्षितमात्रेण

श्री
कु॰
८५
89

जायंते शुद्धयाः प्रिये सा दीक्षा मोक्षदा ज्ञेया शेषा
स्तु जलमेचकः ९० उपासनाशुनेनापि यां विना
नैव सिध्यन्ति तां दीक्षामाश्रयेयत्नाच्छ्रीगुरोर्मंत्र
सिद्धये ९१ रसेंद्रेण यथा सिद्धमयः सौवर्णतां व्र
जेत् दीक्षाविद्धस्तथा ह्यात्मा शिवत्वं लभते प्रिये
९२ दीक्षाग्निदग्धकर्मांशो मायातिछिन्नबंधनः
गताः परोक्षानकानि बीजस्तु शिवो भवेत् ९३
गते शूद्रस्य शूद्रत्वे विप्रस्यापि च विप्रता दीक्षासं
स्कारसंपन्ने जातिभेदो न विद्यते ९४ शिवलिंगे
शिलाबुद्धिं कुर्वन्पापमवाप्नुयात् दीक्षितस्यापि
सर्वत्वं स्मरन्नातः पापमुच्यते ९५ दार्वश्मलोह
मृद्रत्नजातिलिंगप्रतिष्ठितं यथोच्यतेन यथाशु
द्धाः सर्वावर्णास्तु दीक्षिताः ९६ येन पूजितमा
त्रेणाव सर्वस्मभुवनातिकं पूजितेतेन सर्वस्या
दीक्षितेनन संशयः ९७ दीक्षितस्य न कार्यं स्या
न्नयोभिर्नियमैर्व्रतैः न तीर्थक्षेत्रगमनैर्न च शा
रीरयंत्रणैः ९८ मंत्रदीक्षात्वयेकुर्वंजपपूजा
दिकाः क्रियाः न फलंति प्रिये तेषां शिलायामु

त्ववीजवत् ९९ देविदीक्षाविहीनस्य नसिद्धिर्न
चसद्गतिः तस्मात्सर्वप्रयत्नेन गुरुणादीक्षितो
भवेत् १०० द्विजावादीक्षितः पश्चादन्त्यजः पूर्वदी
क्षितः द्विजः कनिष्ठः संज्येष्ठ उतिशास्त्रस्यनिश्च
यः १ गुरुशक्तिस्वतानां वयोभवेत्पूर्वदीक्षितः
गुरुवेत्तेनतेपूज्यानावमान्याकदाचन २ शिष्यो
दीक्षितमात्रेश्च यदिस्वर्गंगतोगुरुः एकसंतान
जेनैवपूर्णांदीक्षांसमाश्रयेत् ३ दर्शनेषुच सर्वे
षु गुणाज्ञानशालिना दीक्षितोयेनविधिनास
मुक्तोनाप्नुयाद्धिये ४ अधिवासनपूर्वंतु चक्रपूजा
पुरःसरं दीक्षयच्छोधनं शिष्यमन्यथा निष्फलं
भवेत् ५ शूद्रसंकरजातीनांनानुशुद्धिर्विधीय
ते पादोदकप्रदानाद्यैः कुर्यात्पाशविमोचनं ६
एकाहेन द्विजो योग्यः क्षत्रयवत्सरद्वयं वैश्यो
योगिस्त्रिभिर्वर्षैश्चतुर्भिः शूद्रमुच्यते ७ विधवा
याःस्वतादेशात्कन्यायाःपितुराज्ञया नाधिकारः
स्वतोन्यस्य भार्यायाभर्तुराज्ञया ८ स्याद्देशाध्यय
नस्य शूद्रोनाधिकारीयथा भवेत् तथैवादीक्षिता

स्थापिनाधिकारीकुलीश्वरि श्रीगुरुंगुरुपत्नींच
तत्पुत्रांश्चापिकौलिकान् दीक्षितानात्मोप्ययेदेविय
थाविभवविस्तरं ११ इतितेकथितंकिंचित्परीक्षा
गुरुशिष्ययोःसमासेनकुलेशानिकिंभूयःश्रोतु
मिच्छसि ११ इतिश्रीकुलार्णवेमहारहस्येउमाम
हेश्वरसंवादेचतुर्दशोल्लासः १४ श्रीदेव्युवाच
कुलेशाधारपात्राणांविधानंचलक्षणं कुल
द्रव्यस्यनिर्माणभेदंमाहात्म्यमेवच अविधानेन
यत्पापंसविधानेनयत्फलं तत्सर्वंश्रोतुमिच्छ
मिवदमेकरुणानिधे श्रीईश्वरउवाच शृणुदेवि
प्रवक्ष्यामियन्मांत्वंपरिपृच्छसि तस्यश्रवणमा
त्रेणत्रिदशैःसमतांव्रजेत् आधारेणविनाभ्रंशो
नचत्वंयांतिमानवः तस्माद्विधिवदाधारंकल्पये
त्कुलनायिके आधारंत्रिपदंप्राहुःपंचदंवाचतुष्प
दं अथवावर्तुलाकारंकुर्याद्देविमनोहरं स्वर्ण
रौप्यशिलाकूर्मकप्पलालावस्फटिमये नारिके
लशंखवस्त्रकाशुक्तिकादिसमुद्भवा अणुपहस्तकु
तैरम्यंपात्रंकुर्याद्विचक्षणः अतिरुक्ममतिस्थ

भिन्नं छिद्रं विवर्जयेत् ताम्रकांस्यादिभिर्लोहैः
पात्रं नैव तु कारयेत् सुवर्णरौप्यपात्राणि सर्व
सिद्धिकराणि च शांतिके च शिलापात्रं स्तंभने व
वश्यामयं नारिकेलं तु वश्यादावभिचारे तु कू
र्मजम् शांखं स्नानप्रदं शुक्राशुक्तिविद्याप्रदायि
नी कपालं लावपात्राणि योगसिद्धिकराणि च
पुण्यहस्तपात्राणि सर्वपापहराणि च उक्तेषु
तेषु देवेशि पात्रमेकं प्रकल्पयेत् कुलद्रव्यं
प्रवक्ष्यामि शृणु देवि समासतः श्रेभमं द्वादशा
प्रस्थं प्रस्थार्धं तक्रमेण च तंडुलानां च तु प्रस्थं
द्विप्रस्थमेडथन्वसो सहिमात्रांकुरे देवि पक
क्षिन्योजयेद्घटे शीतादिरहिते स्थाने दिवस
द्वयमास्यतो यश्चादायै समारोप्य जंग्वा ̈ स
टशं पचेत् श्रवरोपि पुनः शीतमवयातोंकु
रैः सहपादोन प्रस्थकैः पिष्टा हस्ताभ्यां मेलये
त्सुधीः प्रस्थार्धं तंडुलं पक्वा परेषु स्तुत्समांकुरैः
समपक्वास्मर्धं तत्तेन मेलयित्वादि वस्त्रणः प्र
नाच्छभूतले देवि रहस्थाने विनिक्षिपेत् पका

हंवापुनर्नीत्वापुरेयत्नात्तत्समंकुर्वैः सम्यक्वमस्य
तत्तेनपाकमालोक्यमेलयेत् एषापैष्टीतिवि
ख्याताप्रजितादेवदानवैः गौडीचक्ष्येनवक्ष्कल
जंतुत्वक्कथितोभसो दर्शीप्रस्थंकुलेशानियात
कीकुसमंतया नारिकेलप्रसूनंवाचैकाप्रस्थं
विनिक्षिपेत् हरीतकीद्राक्षफलेवस्तनिष्कप्र
माणताः वह्नित्रिकटुकंचापिनिष्कमात्रेक्षिपे
त्प्रिये गुडंद्वादशातःसिद्धमेकस्मिन्योजयेचटेक
रेणभ्रामयेत्सम्यगनुलोमविलोमतः अष्टोत्तर
शताकृत्यात्रिसंध्यांप्रतिवासरम् द्वादशाहेन
पाकःस्याद्गालयेत्त्रयोदशे एषागौडीतिवि।
ख्याताशिवसायुज्यहेतवे कीद्विगुणंमकरंदस्य
वारिसंयोजयेद्घटे षोडशाःहेनपाकःस्याच्छेषं
मन्यत्पुरोक्तवत् एषामाध्वीसमाद्दिष्टादेवता
प्रीतिकारिणी एकाशीतिद्विवह्निश्चमरिचत्रि
तयंतथा धातकीचवत्वर्थ्यंस्यापंचपुष्पाणि
षेसहु अशीतिगुडसंमिश्रंशेषमन्यत्पुरोक्तव
त् इदंमनोहरंद्रव्यंयोगिनीयानतुतमं मांदेस

फलकंदभोमाहिषंप्रस्थकाष्टमोचापकुष्मारं
वापियोगोयंमाहिषःशुभः तैमेलयित्वासंमर्द्ध
सोद्धट्यशापटेक्षिपेत् चत्वारिंशद्दिनान्यष्टोपं
केपंकजसंकुले नियोज्यत्वंकिरणौसौरैःसम्य
विशोषयेत् यदातत्कठिनीभावस्तदासंघट्टय
साधकः गुंजाफलप्रमाणंतुजलेसंस्रोहितंशु
भं श्वात्मेच्छांपूरयेत्प्रीतंपरमानंदनंपरं एतद्
मुत्तमद्रव्यंसर्वदेविप्रियंप्रिये इत्यादिमध्यहे
यानिमद्यान्यन्यानिकारयेत् पानसद्रोत्तमापू
केवेंज्येरननारिकीफलं मद्यान्यकादशैतानि
भक्तिमुक्तिप्रदायनी द्वादशंपंतत्त्वरामयंसर्वे
षांमुत्तमप्रिये गौडीमद्वीचपैष्टीतिविज्ञेयात्रि
विधासुरा सर्वसिद्धिकरापैष्टीगौडीभोगप्रदा
यनी माध्वीमुक्तिकरीज्ञेयासुराख्यादेवताप्रिया
विद्याप्रदोत्तवीहालाङ्गाल्लीराजप्रदायिनी ताल
जास्तंभनेशस्याखाजरीचारिनाशिनी नारिके
लोद्भवाश्रीदापनसाख्याशुभप्रदा मधूकजाता
नकरीचारिष्टारोगनाशिनी मैरेयाख्याकुलेशा

श्री
कु॰
५२
92

तिसर्वपापापहारिणी क्षीरं वृक्षसमुद्भूतमाज्यं
वल्कसंभवं यस्मात्तदेकं विकरं सामोदं च मनो
हरं मद्यं तद्वत्त्वमे देवि देवताप्रीतिकारकं स्पर्शादर्श
नमात्रेण सर्वपापैः प्रमुच्यते तद्गंधाघ्रातमात्रेण
शतक्रतुफलं लभेत् देवि तत्पानतः साक्षाल्लभे
च्छक्तिं चतुर्विधाम् इच्छाशक्तिः स्वरामोदे ज्ञानश
क्तिस्तु तद्रसे तत्साहे च क्रियाशक्तिस्तद्वल्लासे परा
स्थिता मदिवाराछमाने तु चेतःशोधनमाथने ना
मामेकां समास्थाय पूजाकर्म समाचरेत् मद्यमां
सादि विजयाचाष्टागंधैस्तु मिश्रिता समर्प्य वट्को
कृत्वा साध्यास्वाद्या विचक्षणः मद्याभावे तु वट्को
जलेमं लोध्रं तर्पयेत् गुडमिश्रेण तक्रेण तथा
च मधुमाजिना सावेरणावा कुर्यादतत्कर्म न लो
पयेत् प्रमादादि न लेप्येत देवताशापमाप्नुयात्
मांसं तु त्रिविधं प्रोक्तं खभूजलचरं प्रिये यथासं
भवमेकैकं तर्पणार्थं प्रकल्पयेत् मांसस्पर्श
नेनापि स्पर्शदर्शनवत्फलं पितृदैवतयज्ञेषु वेदे
हिंसा विधीयते आत्मार्थं प्राणिनां हिंसा कदाचि

न्नोदिताप्रिये आनिसंत्रेन्दणं वापिछेदयेन्न
कदाचन देवतार्थं द्विजार्थं वा हत्वा पापैर्न लि
प्यते मांसनाहत्य पुण्यं पि पापं स्यात्स्वत्यवाय
तः सन्निमित्तं कृते पापं पुण्यं भवति शांभवि
यैरेव पतनं द्रव्यैः सिद्धिस्तैरेव चोदिता श्रीकौ
लदर्शने देवि भैरवेण महात्मना सत्कर्मकु
र्वतां पुंसां कर्मलोपो न विद्यते तत्कर्मते प्रकु
र्वन्ति सप्तकोटिमुनीश्वराः हत्वा तं मंत्रेन चाने
नत्वभिमंत्र पशुः प्रिये ग्रंथ पुष्पाद्यतैः पूज्य
श्चान्यथा नरकं व्रजेत् शिवोक्तमिदं पिंड।
गत्यर्थं शिवतां गते तद्द्रव्यस्य पशोस्त्वहिना।
शिवत्वं शिवो सिद्धिः ब्रह्मस्यात्पलले विष्णुर्गे
येरुद्रश्चतद्वै वा परमात्मा तदाने दो तस्मात्से
व्यमिदं प्रिये मांसाभावे तलं पुनमाढ्कं नागरे
त्वा आदाय पूजयेद्देवि चान्यथा निष्फलं भ
वेत् मत्स्य मांसविहीनेन मद्येनापि न तर्पयेत्
न कुर्यात्मांसमत्स्याभ्यां विनाद्यवेणपूजनं पि
ष्टातं तिलमांत्रं त्वाति लार्थ मलिवित्स्तुना सहू

श्री॰ कु॰ ९३

93

तर्पणमात्रेण कोटियज्ञफलं भवेत् कुलपूजा
समं नास्ति पुण्यमन्यज्जगत्त्रये तस्माद्यः पूज
येन्नित्यां भुक्तिमुक्त्योः सभाजनं सनधीतोप्यशा
स्त्रज्ञो गुरुभक्तो दृढव्रतः कुलपूजारतो यस्तु
स मे प्रियतमो भवेत् चतुर्णामपि वर्णानामा
श्रमाणां महेश्वरि पुंस्त्रीनपुंसकानां तु पूजिते
ष्टदा मिहि इहामुत्र फलं स्यात्पूजितास्त्ववधू
रिव अपूजितास्त्वं देवेशि डःखदाकुवधूरिव कु
लपूजां तिरायेत्तु यः करोति हि डर्मतिः स याति
नरकं घोरमविच्छिन्नातिभिः कुलैः तस्मात्सर्वप्र
यत्नेन कुलपूजारतो भवेत् लभते सर्वसिद्धी
श्च नात्र कार्या विचारणा आराधनासमर्थश्चेद्द
याद्दृष्टीन साधनं यो दातुं नैव शक्नोति कुर्याद
र्चनदर्शनं सम्यक्तनकृत्वा यत्फलं समवा
मुयात् तत्फलं समवाप्नोति सकृत्कृत्वाक्रमार्चनं
यत्कृत्वा षोडशमहादानानि लभते प्रिये तत्फ
लं समवाप्नोति कृत्वा श्रीचक्रसाधनं सार्धत्रिको
टितीर्थेषु स्नात्वा यत्फलमाप्नुयात् तत्फलं ल

भक्तेभक्त्याकृत्वाश्रीचक्रदर्शनं बहुनोक्तेनकिं
देवियथाशक्त्याददातियः कुलाचार्यायपूजा
र्थंकुलधर्मंस्वधर्मवित् शैवेवैष्णवेशाक्त्यासौ
रेस्मरानदर्शने वौद्धेपशुपतेसांख्येव्रतेकाल
मुखेतथा सदलयामसिद्धांतेवैदकादिषुपा
र्वति विनालिपिशिताभ्यांतुपूजितेनिष्फलंभ
वेत् कुलद्रव्यैर्विनाकुर्याज्जपपूजानयोव्रते नि
ष्फलंतद्भवेदेविभस्मनीवयथाहुतं यथेववा
नराराज्ञःप्रियाःस्युर्नवहिस्वराः तथान्तर्यागा
निष्ठायेप्रियामेदेविनापरे समर्पयंतियेभक्त्या
चावाभ्यांपिशितासवं उत्पादयंतिवानंदंमत्प्रि
याःकौलिकास्तुते श्रावयोःपरमाकारंसच्चिदा
नंदलक्षणं कुलद्रव्यानभावेनपरिस्फुरतिना
न्यथा श्रोतःस्वात्मभवोल्लासोमनोवाचामगो
चरः कुलद्रव्योपभोगेनजायतेनान्यथाप्रिये
सेवितेचकुलद्रव्यैःकुलतत्वार्थवेदिनः जाय
तेभैरवाःवेश्याः सर्वत्रसमदर्शिनःतमःपरि
हतेवेश्मयथादीपेनदृश्यते यथामायाहतो

श्री कुं ५४

94

स्यात्माद्द्रव्यपानेनहेपशुपते मंत्रपूतंकुलंद्रव्यंश्री
रुदेवार्पितंप्रिये येपिवंतिजनास्तेषांस्तविपा
नेन···· मं द्रव्यंतभैरवोदेविमोक्षाशक्तिःस
मीरितः ब्रह्मोपीतंचद्रव्यंहिमोहयेत्त्रिदशान
पि तस्मैरयंशिवेपीत्वायोनाविक्रियतेनरः स
ध्यानैकपरोभूयात्सभक्तःसचकौलिकः स्वय
शक्तिश्शिवोमांसंतज्ज्ञोक्ताभैरवाःस्वयं तयोरैक्य
समुत्पन्नमानंदोमोक्षउच्यते आनंदोब्रह्मणो
रूपंतच्चदेहेव्यवस्थितं तस्याभिव्यंजकंद्रव्यंयोगि
भिस्तेनपीयते कुंडीक···· कपालामधुपूर्ण
निविभ्रतः किंनाथपशुपतिलोकोयंब्रह्मविष्णुम
हेश्वरान् निःशंकोनिर्भयोधीरोनिर्लज्जोनिष्कु
तूहलः निर्णीतवेदशास्त्रार्थेवरदांवारुणी
पिवेत् मंत्रसंस्कारसंशुद्धामृतपानेनपार्वति
गा यतेदेवताभवोभवबंधविमोचकः ब्रह्मण
स्पसदापेयंक्षत्रियस्यरणागमे गौलेवजात्र
वैश्यस्यसूद्रस्यांतेएकर्मणि देवान्पित्रुन्सम
भ्यर्च्यवेदशास्त्रोक्तवर्त्मना गुरुस्मरन्पिवन्सुधं

त्वादन्मांसेनदोषभाक् तृप्यर्थंसर्वदेवानां
ब्रह्मध्यानस्थिरायच सेवेतमधुमांसानि
त्समायाचेत्सपातकी मंत्रार्थस्फुरणार्थंच
मनसःस्थिरहेतवे भवपाशनिवृत्त्यर्थंमं
त्रीपानंसमाचरेत् सेवेदात्मसुखार्थंयोम
द्यादीनिसपातकी प्राशयेद्देवताप्रीत्यैस्व
भिलाषाविवर्जितः मत्स्यमांसासवादीनांप
दार्थानांनिषेवणं यागकालंविनान्यत्रमया
नकथितंप्रिये यथाक्रतुषुविप्राणांसोम
पानेनहर्षितं मंत्रपानेनतथाकार्यंसमये
भोगमोक्षदम् श्रीगुरोःकुलशास्त्रेभ्यःस
म्यग्विज्ञायवासनां पंचमुद्रांनिषेवेतवा
न्यथापतितोभवेत् ब्रह्मन्निर्गुरुपंक्तिश्चव
टुकादीन्नपूजयः वीरोपिवृथापानाद्दे
वताशापमाप्नुयात् अयिष्ठाभैरवेदेवस
कृत्वामंत्रतर्पणं पशुपात्रविधौपीत्वावी
रोपिनरकंव्रजेत् अज्ञात्वाकौलिकाचार
मयिष्ठागुरुपादुकां योस्मिन्शास्त्रेप्रवर्तते

श्री॰ कु॰ ९५

95

---------- सिद्धये कौलज्ञाने ह्यसिद्धे यस्तु
द्रव्यं भोक्तुमिच्छति स महापानको देवि सर्व
कर्मबहिष्कृतः समयाचारहीनस्य स्वैरवृत्ते
स्तथात्मनः न सिद्धयः कुलभ्रंशात्तत्संसर्गं
न कारयेत् यः शास्त्रविधिमुत्सृज्य वर्तते का
मकारतः स सिद्धिमिह नाप्नोति परत्र च शुभां ग
तिं स्वेच्छया वर्तमानो यो दीक्षासंस्कारवर्जितः
न तस्य सद्गतिः क्वापि तपस्तीर्थव्रतादिभिः
असंस्कृतं पिबन्मद्यं बलात्कारेण मैथुनं
स्वप्रियेणाहृतं मांसं रौरवं नरकं व्रजेत् कौ
लः पशुवत्तस्माद्यत्पक्षद्वयविडम्बकः केश
संख्यास्तु यावत्तावत्तिष्ठति रौरवे कुलद्र
व्याणि सेवन्ते ये निदर्शनमाश्रिताः तदंगरो
मसंख्यातभूतयोनिषु जायते मदप्रच्छा
दितात्मा चैव न किंचिदपि वेत्ति हि न ध्यानं न
जपो वा च न धर्मं न च सत्क्रियं न दैवं न गुरु
नीतमाचारं न च कौलिकं केवलं विषया
सक्तः पतत्येव संशयः मद्यासक्तः प्रमत्त

श्चमांसाशी स्त्रीनिषेवकः॥ कौलोपदेशहीनो यः
मोहत्यनरकं व्रजेत् असंस्कारी तयो लौल्यात्पं
चमुद्रा निषेवते कुलेशि ब्रह्महा स स्यान्नित्य।
तामधिगच्छति लिंगत्रयविशेषज्ञः षडाधा
रभेदतः पीठस्थानिनाचागत्य महापद्मवने
व्रजेत् आमूलाधारमाब्रह्मरंध्रं गत्वा पुनः पुनः
चिच्चंद्रकुंडलीशक्तिसामरस्यसुखोदयः व्यो
मपंकजनिःस्यंदसुधापानरतो भवेत् मधु
पानमिदं प्रोक्तमितरे मद्यपायिनः पुण्यापुण्यः
पशुं कृत्वा ज्ञानखड्गेन योगवित् परे लयेन नये
च्चित्ते पलाशी स निगद्यते मनसा चेंद्रियग
णं संयम्यात्मनि योजयेत् मत्स्याशी स भवेद्दे
विशेषास्य: प्राणहिंसकः अप्रबुद्धः पशोः श
क्तिः प्रबुद्धाः कौलिकस्य च शक्तिं तां सेवयेद्य
स्तु स भवेच्छक्तिसेवकः पराशक्त्यात्ममिथु
नसंयोगानंदनिर्भरः यश्चास्ते मैथुनं तत्स्याद
परे स्त्रीनिषेवकाः इत्यादि पंचमुद्राणां वास
नां कुलनायिके ज्ञात्वा गुरुमुखाद्देवि यः सेवे

श्री॰ कु॰ ९८

96

तत्समुच्यते इति ते कथितं किंचित्कुलद्रव्यादि
लक्षणं समासेन कुलेशानि किं भूयः श्रोतुमि
च्छसि ११८ इति श्रीकुलार्णवे महारहस्ये ऊमा
महेश्वरसंवादे पंचदशोल्लासः १५ श्रीदेव्युवा
च कुलेश श्रोतुमिच्छामि करुणामृतवारि का
म्यकर्मविधानं च वद मे परमेश्वर श्रीईश्वर उ
वाच शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि
तस्य श्रवणमात्रेण प्रयोगनिपुणो भवेत् २
मंत्री विशुद्धहृदयः पूर्वोक्तनियमान्वितः श्री
प्रसादापरामंत्रं तत्वलक्षं जपेत्प्रिये ३ दशां
शं तर्पयेच्छुद्धसलिले कुलनायिके मधुत्रय
संयुक्तैः सतिलैः शालितंडुलैः ४ दशांशं ज
हुयाद्देवि संस्कृते हव्यवाहने गंधपुष्पाक्षता
कल्पधनवस्त्रादिभिः प्रिये ५ भोज्यभोजनपा
नाद्यैः कुलद्रव्यैर्मनोहरैः तोषयेद्योगिनीचक्र
यथाविभवविस्तरं ६ एवं न्यासजपध्यानसो
हमार्चनतर्पणैः मंत्री सिद्धमनुर्देवि साक्षात्प
रशिवो भवेत् ७ ततः स्वमनसो भीष्टप्रयोगा

कुलनायिके मंत्रेणानेनमतिमतिसान्त्यादये
द्भुक्तिमुक्तिये प सिद्धमंत्रस्यासिद्धेतिषट्कर्मा
णिनसंशयः नैवसिद्धेन्यासिद्धस्यदेवताशाप
माप्नुयात् ९ काम्यप्रयोगकर्तॄणांपरलोकेन
वियते प्रयोगसिद्धिरेवैषांफलमन्यन्नचप्रिये
१० एकस्यापिविधानस्यनकुत्रापिफलद्वयं दे
वेशिदृश्यतेतस्मान्निष्कामोदेवतांभजेत् ११ हो
मतर्पणमंत्राद्यैःन्यासध्यानविशेषकः आत्म
नश्चपरस्यापितंकर्माणिसमाचरेत् १२ एकल
क्षंजपेन्मंत्रंध्यानन्यासमसमन्वितं प्रयोगदोष
शान्त्यर्थमात्मरक्षार्थमेवच १३ नचेत्फलंभवा
प्नोतिदेवताशापमाप्नुयात् तिथिवारंचकर
णंयोगसमासन्नपञ्चकम् १४ दीपेशांकूर्मचक्रे
णज्ञात्वाकर्माणिसाधयेत् ऋषिछंदोदैवतं
न्यासध्यानार्चनादिकं बीजशक्तिकीलवे
योज्ञात्वा पंचशुद्ध्यासनंप्राणायामन्यासात्त
मालिकाः दोषसंस्कारमुद्रादीज्ञात्वाककोष्ट
वायवदाराख्याशिवोर्णानुकूलतां भूतमैत्री

मथाथ्यानेज्ञात्वामंत्राणिसाधयेत् मंत्रविद्याभे
दनिद्रावोधाग्नीषोमरूपकोष्ठस्थीनपुंसकादी
श्चज्ञात्वा· स्वरवर्णपदबिल्वविन्दुश्चैतन्यमोचके
ह्रस्वदीर्घप्लुतादींश्चज्ञात्वा ग्रथनासमदिग्वर्ण
नाडीतत्वानुसंगतिं देवताकालमुद्रादिज्ञात्वा
कर्माणिसाधयेत् साध्यसाधककर्माणिलेखनी
द्रव्यपंचकेस्थानेमंत्रेप्रमाणंचज्ञात्वाकः उत्पत्ति
रसनान्वर्णमूर्त्तिसंस्कारसंस्थितिं कुंडद्रव्यप्र
माणादीज्ञात्वाकर्म· अग्निप्रभाधूम्रवर्णध्वनिगं
धशिखाकृतिंहुतचेष्टादिकंज्ञात्वाकथयेतशु
भाशुभे मंत्रतत्वानुसंधानेदेहावेशादिलक्ष
णम् मंत्रोच्चारणभेदंचज्ञात्वासः मंडलेकलशे
कार्थोदकंगंधाप्रकादिकम् दीक्षानामप्रदाना
निज्ञात्वादीक्षांसमाचरेत् नित्यंनैमित्तिकंकाम्यं
नियमंनामवासने पूजाधारणयंत्रादिज्ञात्वा
कः पूजागृहप्रवेशादिकुलपूजकलक्षणं कु
लद्रव्यादिशुद्धिंचज्ञात्वापूजांसमाचरेत् अंतर्या
गंवहियागमर्चादिस्थापनार्चनम् पंचशुध्यां

जलिंदेविज्ञात्वाप्नु: पात्राधारालिपिशातेका
लामेलननर्पणेवटुकादिवलिंगदेवि ज्ञा।
त्वाप्नु: कुलकुलाक्षसहजपंक्तिभेदंचलक्षणं
शुभलक्षणसंपन्नस्त्रीसंस्कारार्चनादिकं दे
विसंभोगकालेचज्ञात्वाशक्तिपरिग्रहेतु पा
नभेदपरोल्लासप्रमाणस्थितिलक्षणं तवत्र
यस्यस्वीकारंज्ञात्वाकुलस्वर्थोपिवेत् चक्रप्र
वेशप्रणतिंस्थितिंनिर्गमंप्रिये योगिनीयो
गिचेष्टादिज्ञात्वाभवतिकौलिकः वस्तुहा
सनकालेचकुलदीपनिवेदने शांतिस्तवादि
पठनंज्ञात्वास्यात्कुलदैशिकः मिथुनानियह्ना
ह्लाष्टपुष्पिनीकन्यकार्चने विशेषतिथिपूजा
दिकौलिकारायनक्रमे सिद्धमुद्राथरार्चादि
ज्ञात्वास्यात्कुलदैशिकः आम्नायभेदसंकेतंप्र
छेसकोचनंप्रिये ॐचत्रयंप्रसादायंज्ञात्वा
स्यात्कुलदैशिकः स्तोतोविद्याकुलाचारमा
लिनीभेदपादुकां चरणालित्रयंदेविज्ञात्वा
स्यात्कुलदैशिकः कुलाग्निप्रेतसंस्कारसंतेष्टिं

श्री॰ दिग्बलिक्रमे मोहदीपविधानादिकाम्नाया।
कु॰ त्कुलदैशिकः उत्पाद्याः कथिता किंचिद्विशेषाः
९८ कुलनायिके सर्वेषामपि मंत्राणां विधिसंधार
98 णक्रमे मंत्रांतु देवताहुंफडंताः प्राणे वदक्षि
णे प्रवर्त्यंते ह्यधांतः स्वविद्यास्त्रीदेवताश्रिये
वामे प्राणे प्रवर्त्यंते नमोंताः स्तनप्रेमकः नाडेह
यगते प्राणे सर्वे वीर्यं प्रयांति च शांतिके मनवः
सौम्याः भूमिष्ठास्स्वमस्तकाः त्वराः स्वाहांताः स्वविं
यस्त्रायास्तज्ज्ञेयाः क्रूरकर्मस्व फडुच्चाटे वषड्वश्ये
हुंद्वेषे चैव मारणे स्तंभने च नमः प्रोक्तं स्वाहा
शांतिकपौष्टिके होमतर्पणयोः स्वाहान्यास पू
जनयोर्नमः मंत्रांते योजयेन्मंत्री जपकाली यथा
स्थिति शांतिके राजतं ताम्रं भूर्जपत्रं तु वश्यके
सर्वकार्येषु सौवर्णं क्रूरे स्यात्प्रेतकर्पटं त्रिगंधं
शांतिके प्रोक्तं पंचगंधं तु वश्यके सर्वकार्येष्टगं
धं मस्यात्क्रूरे चाष्टविषाणि च शांतिके लेखनी दूर्वा
वश्यादौ शाखिविपिंविका हेम्यास्सर्वाणि कार्याणि
क्रूरे स्यात्काकपक्षिका गृहे तु शांतिकर्मस्याद

श्पार्थं चंडिकालये सर्वकार्यं देवगृहे श्मशाने
क्रूरकर्मेच लक्षणान्येवमादीनि ज्ञात्वा गुरुमु
त्प्रिये सर्वकर्माणि कुर्वीत मंत्री तत्फलाप्तये
मूले प्रसादबीजं तु दहनादित्यसन्निभम् तत्र
मांगे पराबीजं चन्द्रायुतसमप्रभं परस्परकर
स्पर्शोज्ज्वलितानन्दनिर्भरं मलादिबन्धरंध्रान्तम
न्ववच्छिन्नदीप्तिपिभिः परामृतरसामेकैः सिक्त
मापादमस्तकं आत्मानं भावयेन्नित्यं स भवेदज
रामरः एवं ध्यात्वा कुलेशानि सर्वकर्माणि साध
येत् सिध्यन्ति तस्मादेविनाऽत्र कार्या विचारणा ध्या
नमेदं प्रवक्ष्यामि सर्वसिद्धिकरं प्रिये ईप्सितं ल
भते येन पूजाहोमादिकं विना ध्याने मनोहरे दे
वि सायकस्थिरमानसः स्थित्वा सत्वासने ध्याये
द्रूहवेदनपूर्वकं मस्तमस्तकस्थितसंपूर्णाचं
द्रमण्डलमध्यगं श्रीप्रसादापरंबीजं षोडशास्व
रसंस्कृतं मुक्तास्फटिककर्पूरकुंदेन्दुधवलं प्रि
ये सद्बिन्दुबीजसंजातं स्वयासावितविग्रहं आ
त्मानं भावयेद्देवि निश्चलेनान्तरात्मना श्रीप्रा

श्री॰
कु॰
५५
99

सारपरामंत्रमष्टोत्तरसहस्रकं तद्गुणोल्लाससम
न्वितोमंडलेप्रजपेत्प्रिये अपमृत्युमहारोगज
रामरणजंभयं ग्रहापस्मारवेतालभूतोन्मादा
दिजंभयं जरादिव्याधिरहितःपुत्रपौत्रसमन्वितः
जीवेद्वर्षशतंसाग्रंपूजितःसर्वमानवैः अस्फुटं
वुध्यतेशास्त्रंकवितानिर्मलाभवेत् चित्तयोजा
यतेसाक्षात्त्रात्रकार्याविचारणा ज्वरोन्मादादिरो
गेषुजपेच्छिरसिचिंतयेत् शूलवातहृणग्रंथिमू
त्रकृच्छ्रादिसंभवेत् तत्तत्स्थानेषुदेवेशिपूर्वव
च्चिंतयेजपेत् महारोगेषुजातेषुसर्वांगेषुचचिं
तयेत् तत्क्षणाच्छांतिमायांतिरोगाःसर्वेनसंश
यः दशेन्द्रियेषुयोध्यायोल्लभेदिंद्रियसौष्ठवं
यत्रवीजंस्मरेत्तत्रतत्फलंभवतिप्रिये सदाय।
श्चिंतयेन्मूर्ध्निसभवेदजरामरः सर्वरोगयहहृ
दंविद्यारोग्यप्रदंप्रिये अस्मात्परतरंध्यानंनास्ति
सत्येनसंशयः सात्विकध्यानजंदेविफलमेत
दुदीरितं शांतिकर्माणिसर्वाणिविधिनानेनसा
धयेत् द्वादशाधारपद्मेषुद्वादशस्वरसंयुतं वी

जे संचिंतयेद्यस्तु स भवेदजरामरः षडाधारेषु

षड्दीर्घयुतं देवी जे वि चिंतयेत् षडाधारस्य दे

वीभिः पूजिते कुलनायिके ऊर्ध्वग्रकर्णिकाम

ध्ये सूर्यमंडलसंस्थिते पराप्रासादबीजं तदरु

णादित्यसन्निभं जपवंधूकसिन्दूरपद्मरागप्र

भोज्वलं आत्मानं संस्मरेद्देवि निश्चलेनांतरात्म

ना पराप्रासादबीजं तद्योववनोल्लाससंयुतः अ

ष्टोत्तरसहस्रं तु मंडली प्रजपेत्सुधीः देवदान

वगंधर्वसिद्धयक्षकिन्नरान् विद्याधरांस्तु

नीन्यस्तानागान्नप्सरसस्त्रियः सिंहव्याघ्रोनग

थादीनन्यान्सष्टसगानपि वशीकरोत्यसंदेहः

किं पुनर्मानवादिकान् महदैश्वर्यमाप्नोति

स्वर्गभोगादिकं प्रिये यस्स मूर्धिं स्मरेल्लयात्स

वश्यो जायते चिरात् राजसंध्यानजं देवि फ

लमेतदुदीरितं वश्यकर्माणि सर्वाणि विधिना

नेन साधयेत् सर्ववश्यकरं देवि सर्वैश्वर्यफ

लप्रदम् अस्मात्परतरं ध्यानं नास्ति सत्यं न सं

शयः मूलाधारसरोजांतर्वह्निमंडलमध्यगं

श्री
कु॰
१००

पराप्रासादबीजं तत्कल्पान्ताग्निसमप्रभं प्रतिलो
मैस्तु संवीतं दशभिर्व्यापकान्तरैः स्वयं कल्पान
लसमः सर्वभूतभयंकरः दक्षिणाशान्वितस्तु ।
विश्वोग्रदृष्टिर्मलीमसः यौवनोल्लाससंहितः
पराप्रासादसंज्ञकं मंत्रं तन्मंडले जप्यात् दक्षोत्तर
सहस्रकं अनिष्टकारिणः सर्वान् कलहायासका
रिणः वृथाद्वेषकरान् क्रूरान् सपर्याविघ्नकारिणः
भूतोग्रग्रहवेतालपिशाचब्रह्मराक्षसान् इत्या
दिदुष्टजंतून् सर्वान् सदाक्षेपकरान् परान् तद्वह्निम
ध्यपतितान् निर्दग्धांश्च विचिंतयेत् तत्क्षणेन नाश
मायांति शलभाश्व पावेति यस्त्वभिस्मरेद्बीजं
समस्तुमधिगच्छति ध्यानेनानेन देवेशि काला
दीनपि नाशयेत् ग्रहरोगादिदुष्टादि विनाश
नकरं प्रिये अस्मात्परतरं ध्यानं नास्ति सत्येन सं
शयः तामसध्यानजं देवि फलमेतदुदीरितं
दुष्टमारणकर्माणि विधिनानेन साधयेत् इत्या
दिध्यानभेदांश्च ज्ञात्वा गुरुमुखात्प्रिये षट्कर्मा
णि प्रयुंजीत नान्यथा वीरवंदिते खदिरास्त्रेति

100

मंदाराम्लताभाण्डुसमिद्धैः पनसोडुंबराश्व
त्थल्लक्षापामार्गसद्धैः नंद्यावर्तसितांभोजह्र
याभिकुसुममादिभिः शितै रन्यैः शुभैर्द्रव्यैः समि
त्पत्रफलान्नवैः भक्ष्यैः सपायसैर्हवी सहितैस्ति
लतंडुलैः मधुरत्रयसंयुक्तैर्मंत्रवित्कुलनायि
के प्रत्येकेन वाथ सर्वैर्वा सत्कार्येषु फलाच्चवै ज्ञा
त्वा देवि सहस्रं वा त्रिसहस्रं त्वपंचवा प्रयुतं नि
युतं वापि प्रयुतं वा कुलेश्वरि तत्तत्कर्मोदिते कुं
डे संस्कृते हव्यवाहने आवाह्य देवतामस्मिन्यथा
न्यासावरणाश्रिये विधिवज्जुहुयाद्देवि तज्जने
नांतरात्मना सर्वरोगहरणोन्मादापस्मारोत्पात
कृत्यजे सर्वदुःखप्रशमये न्नृणां नात्र न संश
यः अनेन सर्वशांतिः स्याद्धियाज्ञाने लभेत्प्रिये
कदंबाशोकबकुलपन्नगाम्रमधूकजैः पंचं
कह्वपालाशपाटलश्रीकपित्थजैः मालती
मल्लिकाजातिबंधूककारणापंकजैः कल्हारहार
णामंदारजातिकुंदजपादिभिः रक्तैरन्यैः शुभैर्द्र
व्यैः समित्पत्रफलान्नवैः पूर्ववज्जुहुयाद्देवि वि

श्री कु॰ ९२

१०१

पिवन्मंत्रवित्तमः ह्रीपतीश्वपुत्रघाह्लांतायौव
नगर्विताः सिद्धाम्मत्तगजान्व्याघ्रान्सर्वेडष्ट म
गानपि सिद्धदेवाप्सरोयक्षनागगंधर्ववनितानपि
देवानपि कुलेशानि वशयेन्नात्र संशयः राजील
वणहोमेन स्त्रियमाकर्षयेद्भ्रुतं विधिनानेन दे
वेशि सौभाग्यमतुलं भवेत् पीतद्रव्यैर्हरिद्रायैः
समित्पत्रफलान्नवैः जुहुयात्पूर्ववन्मंत्री देवता
ध्यानतत्परः वाक्स्तंभयति दक्षेतानदीग्रहहरि
पृथ्वियेनानाडष्टसरगान्देवि स्तंभयेन्नात्र संशयः
निम्बकारस्करोन्मत्तमर्कटीविषदंडिभिः अग्निकं
ठकहस्त्यादिर्ईश्वरस्रुभसादिणः कृटवाजैः कु
माव र्णैस्समित्पत्रफलान्नवैः गृहधूमविताग्ग
रात्रिकढग्निविर्षोचनैः उन्मत्तरसमशक्तिपि।
ष्टासमपक्वसाधनैः साध्यपादरजोभिश्च चिता
भस्मसमन्वितैः साध्यप्रतिकृतिं कुर्यादेकांत
त्तत्रवत्तनाम सम्यक्प्रतिष्ठितप्राणाकुंडस्योप
रिलवयेत् एवनेत्स्त्वमानिमान्मंत्री कुंडस्याठाय
याविधिः मलेसमेन मनसा उग्रदष्टाहिरमर्षणः

चितानले विषतरुन्मत्तकाष्ठसमेधिते तद्वै
र्जुहुयाद्देवि विधिवन्मंत्रवित्तमः कुर्याद्द्वेष
णोच्चाटमारणादिनसंशयः शांतिके सात्विके
देविश्वेतवर्णं विचिंतयेत् वश्येत्तु राजसं देवि
रक्तवर्णं विचिंतयेत् तामसे क्रूरकार्येषु कृष्ण
वर्णं विचिंतयेत् आत्मवत्तो पुरा कृत्वा पश्चात्क
र्माणि साधयेत् येन्यथा कुरुते मोहात्स भवे
द्देवता पशुः तस्माद्देवि महाषोढान्यासं पूजां व
लिं सुधीः कृत्वा कर्माणि कुर्वीत नान्यथा वीर
वंदिते लिखेत्रिकोणं षट्कोणमष्टारं च मही
पुरं मूलमंत्रं लिखेन्मध्ये साध्यनाम समन्विते ष
ट्कोणेषु षडंगानि विलिखेत्परमेश्वरि केस
रेषु स्वरान्दद्यादष्टौ वर्गान्पत्रेषु पार्वति भूपुरेषु
चतुष्कोणेषु लिखेन्मंत्रमंबिके पंचवर्णरजो
भिस्तु शुभं दृष्टिमनोहरं एवं यंत्रं समालिख्य
विधिवन्मंत्रवित्तमः एकात्रिषड्सप्तचतुःकल
शान्स्थापयेत्प्रिये मध्यादिचतुरस्रांतं ह्यावि
शाति चरान्क्रमात् अथवाष्टदशोशानि दश

वासप्तवाप्रिये चतुरोवाप्यथैकंवाकुर्यात्साध
कशक्तितः अश्विरक्तसितातंतुस्तम्भेसंस्थपितं
जल चर्मवस्त्रेशिरावर्चेनारिकेलफलंशिरः
मंत्रप्राणसमायुक्तंयजेत्कलशदेवतां सात्वित्रि
मूर्त्तिरंशादिमातरोभैरवान्विताः विदिक्षुग्रहवि
मेशाङ्गोद्देत्रपत्नीन्प्रिये कलशेषुसमभ्यर्च्य
विधिवन्मंत्रवित्तमाः अभिषिंचेत्प्रियंशिष्यंस
र्वपापप्रशांतयेत् आयुश्रीःकीर्तिसौभाग्यवि
द्यारोग्यादिकंभवेत् राजाभिषिक्तोलभतेचैतः
सागरांमहीं अकिंचिनोभिषाक्तस्तु महदैश्व
र्यमाप्नुयात् वंध्याभिषिक्तालभतेपुत्रंसर्वगु
णान्वितं भूतापस्मारतरोगाद्याविनश्यंतिनसं
शयः त्रिलोहेवा पिभूर्जेवालिखित्वायंत्रमुत्त
मंविधृतंवहुनादेविसर्वरत्नाकरंभवेत् आयु
रारोग्यमैश्वर्यंविद्यालाभंयशोजयं यद्यत्सम
नसोभीष्टंसर्वमाप्नोतिसंशयः खड्गदृश्यव
यक्तेमयद्दिणांजनपादुकाः अणिमाद्यष्टसि
द्धादिमहारसरसायणं संजीवयोगगुटिका

प्रमुखोखिलसिद्धयः पराप्रासादमंत्रस्तोह
ष्पतेनात्रसंशयः वहुनात्रकिमुक्तेनत्रिषुलो
केषुमन्त्रिणः अनेनमंत्रराजेननासाध्यंविद्यते
क्वचित् ऊर्ध्वाम्नायैकनिष्ठांतः पराप्रासादमंत्र
वित् कुलार्णवार्थतत्त्वज्ञोजीवन्मुक्तः कुलेश्व
रि स तीर्थेवाप्यतीर्थेवाजननमध्येयथावसन्
पराप्रासादमंत्रज्ञोमुक्तएवनसंशयः दिक्षी
ठलेत्रमुद्राश्चहृद्वल्लीमदादिकाः परभैरव
देवस्यनोर्धीमायस्यपार्वति इतितेकथितंकि
चिकाकर्मासिलक्षणं समासेनकुलेशानिकिं
भूयःश्रोतुमिच्छसि १३३ इतिश्रीकुलार्णवेम
हारहस्येकाम्यकर्मकथनंनामषोडशोल्ला
सः १६ श्रीदेव्युवाच ॐकुलेशश्रोतुमिच्छामि
गुरुनामादिलक्षणं तत्त्वंकुलपदार्थानांवद
मेपरमेश्वर श्रीईश्वरउवाच शृणुदेविप्रवक्ष्या
मियन्मांत्वंपरिपृच्छसि तस्यश्रवणमात्रेणकु
लज्ञानंप्रकाशते गकारश्चाङ्कारःस्याद्गुका
रस्तन्निरोधकाः अथकारनिरोधित्वाद्गुरुरि

श्री कु॰ १०३

103

त्यभिधीयते गुह्यागमार्थतत्त्वमंत्रसंधानाद्बोध
नादपि रुद्रादिदेवरूपत्वाद्गुरुरित्यभिधीय
ते स्वयमाचरते शिष्यानाचारे स्थापयत्यपि आ
शिनोति हि शास्त्रार्थमाचारस्तेन कथ्यते आ
म्नायतत्त्ववित्त्वाच्चराचरसमाननतः यमा
दियोगसिद्धत्वादाचार्य इति कथ्यते आत्मभा
वप्रदानाच्च रागद्वेषादिवर्जनात् ध्यानैकनि
ष्ठचित्तत्वादाराध्य इति कथ्यते देवतारूपधा
रित्वाच्छिष्यानुग्रहकारणात् करुणामयमू
र्तित्वात्स्वामीति कथिताः प्रिये स्वतंत्रोताः सम
मीलत्परतत्त्वार्थचिंतनात् मिथ्याज्ञानविही
नत्वात्स्वामीति कथितः प्रिये श्रीमोक्षदानदक्ष
त्वान्नदब्रह्मानुमोदनात् स्थगिताज्ञानविभ
वाद्धीनाथ इत्यकथ्यते देशकालाविरोधेन
वर्तनात्कुलनायिके वशीकृत्यजगज्जाला
देव इतिभिधीयते भवपाशप्रशमनात्टंका
कारेत्समंश्रयात् रत्नाणाकमनीयत्वाद्भदार
क इतीरिता प्रगमागमवेदांतरहस्यार्थवि

भावनात् भुक्तिमुक्तिप्रदानश्च प्रभुरित्यभिधी
यते योनिमुद्रानुसंधान प्रस्फुरमंत्रवैभवान्
गीर्वाणगजपूजित्वा योगीति कथिताः प्रिये
मेगडः खपरित्यागायत्रकुत्र समाश्रयात् मि
थ्यः स्वात्मानुसंधानात्संयमीत्यभिधीयते तत्व
स्वरूपमननात्परिवादादिवर्जनात् स्वीकारा
च्छुभकार्याणां तपस्वीत्यभिधीयते अजरत्वा
द्धरणत्वाद्भूतसंसारसंकरात् तत्वसम्पार्थसि
द्धत्वाद्देवभूतोभिधीयते वीतरागमदक्लेश
कोपमात्सर्यमोहितः रजस्तमैतिदूरत्वाद्वीर
इत्यभिधीयते मनोदोषादिरूपत्वाद्वैतवादा
दिवर्जनात् ब्रह्मादिप्राणिस्व समदृशत्वाच्च
महेश्वरः कुलेगोत्रे समाख्यातेतच्च शक्तिशि
वोद्भवे येन विश्वमिति ज्ञाने कौलिकः सोभिधी
यते अकुलेशिव इत्युक्ते कुं शक्तिप्रकीर्तितः
कुलाकुलानुसंधाननिपुणः कौलिकः प्रिये
सारसंग्रहणाच्चैव धर्ममार्गप्रवर्तनात् कर
णग्राम नियमात्साधकः सोभिधीयते भजना

श्री त्वरयाभक्त्या मनोवाक्कायशक्तितः नरत्याखिल
कु॰ दुःखानि तस्माद्भक्तइतीरितः शरीरमर्थप्राणा
१५४ श्चसद्गुरुभ्यो निवेदयन्ः गुरुभिःशासितेयोग्यः
104 शिष्य इत्यभिधीयते शतकोटिमहादिव्ययोगि
नीप्रीतिकारणात् तीव्रस्फूर्तिप्रसादाच्चशक्ति
रित्यभ्यधीयते पालनादुरितोद्भेदाकामितार्थ
प्रवर्धनात् पादुकेति समाख्यातमतत्वंतवप्रि
ये विरतार्थविकासाच्च रक्षणादपिपार्वति
नरनारीस्वरूपत्वाच्चरणौ कथितौ प्रिये वेदित
व्याखिलाभीष्टसद्धर्मार्थनिरूपणा तिमिरोत्सा
यनाद्देवि स्मृतिरित्यभिधीयते पुण्यपापादिक
थनाद्व्याध्याधिनिवारणात् नवभक्त्यादिजनना
त्पुराणमिति कथ्यते इष्टधर्मकथापालात्तिर
स्कानभंजनात् हरणात्सर्वदुःखानामितिहास
इतीरितः स्वाचरकाथ्यादिव्यगतिप्राप्तिविधान
तः महावाक्येस्तु कथनादागमः कथितः प्रिये
शाकिनीगणपूजित्वात्तरणाद्भववारिधेः परा
पिशक्तिसान्निध्याच्छाक्तमभिधीयते कौमार्यादि

तिर्मेव्यत्वाल्लयजन्माभिभंजनात् अशेषकुल
संबंधात्कौलमित्यभिधीयते पाशाच्छेदकराद्दे
विरंजनात्परतो जपः इतिभिक्षित्यमानात्स्वपा
रंपर्यमितीरिते संसारसारभूतत्वात्प्रका
शनेददानतः यशःसौभाग्यकरणात्संप्रदा
यइतीरितः आदित्वात्सर्वमार्गाणां मनोल्लास
प्रवर्धनात् यत्नादिथमहेतुत्वादाम्नायइति।
कीर्तितः स्फुरानेकमहामंत्रयंत्रतंत्रादिदेव
तात् स्रोतोवदनविछिन्नाद्भुतमित्यभिधीय
ते आश्रयतत्वरूपत्वाज्ज्ञानतथार्थनिरूपणात्
रामहेशादिशमनादाचारइतिकथ्यते दिव्य
भावप्रदानात्संक्षालनात्किल्बिषस्य दीक्षे
तिकथिता सद्भिर्भवबंधविमोचिनी अहंभाव
हराद्धीतिमथनात्सर्वनादपि कंपानंदादिज
ननादभिषेकइतिस्मृतः उज्वलत्वात्परत्वाश्च
देवताभावदानतः शक्तिपातनिमित्तत्वादुप
दीशःइतीरितः मननात्रूपस्यदेवस्यामि
ततेजसः त्रायतेसर्वभयतस्तस्मान्मंत्रमिती

श्री कु. १०५

105

रितं देहमास्थाय भक्तानां वरविश्राणनात्प्रिये
तापत्रयादिशमनाद्देवतापरिकीर्तितः न्यायो
पार्जितमंत्राणां मेरोषु विनिवेशनाशनात् स
र्वरत्नाकरे विन्यासश्चाप्यभिधीयते जन्मांतरस
हस्रेषु कृतपापप्रणाशनात् परदेवप्रका
शाश्च जपश्चोच्यते प्रिये स्तोकस्तोकेन मनसा
परमाप्रीतिकारणात् स्तोत्रमंत्रानणाद्देविस्तो
त्रमित्यभिधीयते यावदिंद्रियसंकांते मनसा
मनिरूप्यच स्वात्मन्यभीष्टदेवस्य चिंतनं ध्यान
मुच्यते मुदं कुर्वंति देवानां मनांसि द्रावयंति च
तस्मान्मुद्रा इति ख्याता दर्पणं तर्पणं कुलेश्वरि स्व
नंतफलदानाच्चत्वापि नाशेषकल्मषात् मात्र
कात्मनया लाभकरणाद्दक्षमालिका यमहता
दिसर्वेभ्यो भयेभ्योपि महेश्वरि त्रायते संततं
चैवतस्मायंत्रमितीरितं आत्मशुद्धिप्रदानाच्च
सर्वरोगनिवारणात् नवसिद्धिप्रदात्स्वादा
सनं कथितं प्रिये श्राश्रस्तारूपत्वात्पद
व्यप्रियादपि रक्षणादपि वाप्येयसाधारं तस्मा

यारंते विघ्नध्वंसया मंगलत्वाच्च डाकिन्यायोगि
नीगणसंश्रयात् ललितत्वाच्च देवेशि मंडलं
परिकीर्तितं कमलासनरूपत्वाल्लघुत्वाद्देवि
नाशनात् शमितापारपापाच्च कलशं कथितं
प्रिये पातंगरूपविंबत्वाच्चित्तचक्र लशाश्रया
त् पतितत्राणनाद्देवि पात्रमित्यभीयते अवि
लाचप्रशमनाद्दनगुणाविवर्धनात् अनर्घफ
लदानात दर्घमित्यभिधीयते महादानार्थरू
पत्वाद्यागाभ्युदयैककरणात् सद्भावजननाद्दे
वि मनामित्यभिधीयते स्वमनःसंवितत्वाच्च
गायितत्वात्सदाप्रिये स्वराकारप्रदानाच्च स्वरे
ति परिकीर्तितः अमृतत्वाच्च स्वरूपत्वात्संसृतिभी
तिनिवारणात् तत्वप्रकाशहेतुत्वादमृतंक
थितं प्रिये आघ्राणनागप्रशमनान्मोक्षमार्ग
निरूपणात् दर्पदुःखक्षयविभवादामोद इति
कथ्यते मंगल्यजननाद्देवि संविदानंददान
तः सर्वदेवप्रियत्वाच्च मांसमित्यभिधीयते
पूर्वजन्मादिशमनाजन्मसंसृतिनिवारणात्

श्री· कु· १०९ 106

संपूर्णफलदानाच्च पूजेति कथिता प्रिये अभी
ष्टफलदानाच्च चतुर्वर्गफलाश्रयात् नंदनात्स
र्वदेवानामर्चने संप्रदाय्यते गंभीरपारदौर्भाग्य
क्लेशनाशनकारणात् यन्याकारप्रदानाच्च गं
ध इत्यभिधीयते अमलत्वात्क्लेशानिर्वापिता
शेषकल्मषात् तादात्म्यकरणाच्चाप्यक्षताश्चो
क्तामयानचे पुष्कलार्थप्रदानाच्च पापौघपरि
हारतः परंमनःप्रसादाच्च पुष्पमित्यभिधीय
ते धूताशेषमहादोषघनगंधप्रभावतः पर
मामोदजननाद्धूप इत्यभिधीयते दीर्घाज्ञानम
हाध्वांतहंकारपरिवर्जनात् परतत्त्वप्रकाश
श्च दीप इत्यभिधीयते मोहध्वांतप्रशमनात्तदु
त्पत्तिविनाशनात् मोहदीप इति ख्यातो मोक्ष
मार्गैकमायने चतुर्विधक्लेशानि दिव्यान्नष
ड्रसान्विते निवेदनाद्भवेत्स्मिन्नैवेद्यं तदुदीरि
तं वह्निविकारविचरत्तो च प्रीतिकारणात्
लिप्तपापप्रकाशमानाद्बलिरित्यभिधीयते
तत्त्वत्रयविशुद्धिस्यात्सेवामंत्रतः प्रिये तव

प्रकाशहेतुत्वात्तत्त्वात्रियमितीरिते चतुर्वर्ग
फलावाप्त्वविनाज्ञानवेधनात् कल्याण
धर्ममूलत्वाच्चलकंकथितेप्रिये प्रकाशानन्द
जननात्स्वामरस्यप्रदानतः दयाप्रसादकर
णात्प्रसादरूपकथ्यते उन्मनीकरणाद्धुड्डेली
वस्यजननादपि सद्भावजननाद्देविउल्लास
रूपकथ्यते आदिमध्यान्तरहितनवप्रीतिप्र
दानतः दर्शनात्परतत्त्वस्यध्यानेदूतिकथ्य
ते पाशसंछेदनाद्देविनरत्वविनिवारणात्
पावनात्परमेष्ठानिपानमित्यभिधीयते श्री
कैवल्यप्रदानाच्चचतुर्वर्गैककारणात् कुत
वद्देवितुष्टिवाङ्खीचक्रमितिकथ्यते भवडः
त्वप्रशमनीवज्ञानप्रदानतः भद्रार्थकरण
द्देविभक्तिरभिधीयते कर्मणामनसावाचास
दीवस्थानसर्वदा समीपेमेवाविधिवडुपा
यिरितिकथ्यते पंचांगोपासनेनेष्टदेवताप्री
तिमानसात् प्रस्फुरितभक्तस्यतत्स्वरस्वरणं
भवेत् आवाहनादिकर्माणिषोडशोद्वासना

श्री· वधि विधिनाचरणंप्रोक्तमुपचारइतिप्रिये सं
कु· पूज्यसाहतिंदेवंषोडशैरुपचारकैः स्वस्थानो
१०७ द्गमनंप्रोक्तमुद्वासनमितिप्रिये देविपूजार्थमा
107 ह्वानमावाहनमितिस्मृतं आसनेसंनिवेशःस्या
त्स्थापनेकुलनायिके अन्योन्यसंमुखीकारःस
न्निधानमुदीरितं यत्रकुत्राप्यचलनंसन्निरोधन
मुच्यते देवतांगेषडंगादिन्यासःस्यात्सकलीकृतं
आच्छादनेसमुद्दिष्टमवगुंठनमीश्वरि दर्शयेद्धे
नुमुद्रामृतीकरणंप्रिये तमसेत्यंजलिर्दे
विपरमीकरणंभवेत् स्वागतंकुशलप्रश्नंनि
गदेद्देवतांप्रिये पाद्यंश्यामाकदूर्वाब्जविष्णुक्रां
ताभिरुच्यते जातीलवंगकंकोलैरुक्तमाचम
नीयकं सिद्धार्थमक्षतंचैवकुशाग्रंतिलमेव
च यवगंधफलंपुष्पमष्टांगार्घ्यंप्रकीर्तितं
मध्वाज्यदधिभिःप्रोक्तंमधुपर्कंकुलेश्वरि देव
प्रक्षालनेस्नानेस्वगंधसलिलैःप्रिये चंद्रचंद
नकस्तूरीकालागुरुभिरुच्यते अष्टांगघ्राणि
पातस्तुवंदनंकाथितेप्रिये एतच्चराचरंसर्वं

क्षेत्रमित्यभिधीयते तंक्षेत्रंपालितंयेनक्षेत्रपा
लसउच्यते इतितेकथितंकिंविरुनामादेवा
मनाः समासेनकुलेशानियोजानातिसदेशि
कः रहस्यानिरहस्यानांरहस्योयंकुलेश्वरि ऊ
र्ध्वाम्नायाःसमाख्यातःसमासेननविस्तरात्
कुलार्णवमिदंशास्त्रंयोगिनीनांहृदिस्थितं प्र
काशितंमयातेह्यगोपनीयंप्रयत्नतः पुस्तकं
चकुलेशानिपशुगेहेननिक्षिपेत् नदद्यात्प
शुहस्तेचनपठेत्पशुसन्निधौ नपठेन्नामवोला
सोग¨ मूमौनक्षिपेत् नित्यंसंपूजयेद्भक्त्या
जानीयाद्गुरुवक्त्रतः नापुत्रायप्रवोक्तव्यंना
शिष्यायकदाचन स्नेहाल्लोभाद्भयाद्भक्त्यासप
र्येयोभविष्यति देविमायायदक्षत्तत्तन्नकिंवि
न्मयोदितं साधकानांहितार्थायमुक्तिभुक्ति
फलेप्रदं यऊर्ध्वाम्नायमहात्म्यंपठेच्छ्रीचक्र
सन्निधौभक्त्यापरमयादेवियःशृणोतिहि
कौलिकः व्रतदानतपस्तीर्थयज्ञदेवार्चना
दिषुयत्फलंकोटिगुणितंलभतेनात्रसंशयः

श्री कु॰ १०८

108

वत्सन्निर्यौ च नियमे नात्र कार्या विचारणा इति
श्रीकुलार्णवे महारहस्ये ईश्वरपार्वतीसंवा
दे पंचमखंडे गुरुनामवासनादिकथनं ना
म सप्तदशोल्लासः १७ ॥ शुभं ॥

